

श्रीगणेशायनमः॥ ॥नत्वा बौधायनाचार्यंतेनोक्तश्रौतकर्मणां॥विध्यतिक्रमण
प्रायश्चित्तदीपः प्रकथ्यते॥१॥श्रौते बौधायनोक्तानिप्रायश्चित्तानियानितु॥उक्तो
निश्रौतनाथेचवर्यगोपालसूरिणा॥२॥व्यासोक्तानिप्रकीर्णानितैरनुक्तानिया
नितु॥देवस्वामिमतानेषांविस्तरान्निर्णयंब्रुवे॥३॥पंचप्रकरणान्यत्रस्याधानंत्व
ग्निहोत्रकं॥दर्शयाग्रयणंचत्रसोमश्चेतियथाक्रमं॥४॥अथातोमंत्रगणाम्ना
नीत्यादि॥अथशब्दआनंतर्येकर्माण्यभिधायअनंतरंप्रायश्चित्तमभिधीयते।
अतःशब्दोहेत्वर्थेयस्मात्कर्मणिवैगुण्येसतिप्रायश्चित्तकृतेकर्मसगुणंभवति
अतःप्रायश्चित्तानिचास्यास्यामः॥विहितानामकरणेअन्यथाकरणेवाप्रायश्चि
त्तंविधीयते॥मंत्रगणाम्नातानि॥मंत्रैर्गणेनाम्नातानि॥कानिचिन्मंत्रेणावगम्य
ते॥कानिचिद्गणेनब्रह्मप्रतिष्ठामनसइत्येवमादीनांप्रायश्चित्तत्वंमंत्रसामर्थ्ये

नावगम्यते॥ध्रुवंतेमनसस्पतइत्येवमादीनांप्रायश्चित्तत्वंगणसामर्थ्यादवगम्य
ते॥प्रायोविनाशःचित्तंसंधानं॥तदुच्यते॥सर्वत्रप्रायश्चित्तहोमेषुस्मार्तंवदाज्यं
संस्कृत्यजुहुयात्तत्रअग्नेरुत्तरतोदर्भेषुआज्यस्थालीस्रुवंजुहूंप्रोक्षणीचासा
द्यपवित्रेकृत्वाप्रोक्षणीसंस्कृत्यपात्राणिप्रोक्ष्यतिरःपवित्रमाज्यस्थाल्यामाज्यंनि
रूप्यउदीचींगारांनिरूह्यतान्कृत्वातेषधिष्ठित्यअभिघोतेनअभिघोत्यहृदभिमृ
शन्यप्रक्षाल्यप्रत्यस्यपुनरभिघोत्यपर्यग्निकृत्वावर्मकुर्वन्मुद्गुह्यास्यप्रत्यङ्मुखा
रानुदीचीनाग्राभ्यांपुनराहारमाज्यंत्रिरुत्प्लुत्यपवित्रेअद्भिःसंस्पृश्यअग्नावनुप्रह
त्यस्रुवंजुहूंचनिष्पवदर्भैःसंमृज्यअद्भिःसंस्पृश्यपुर्निष्पवदर्भानग्नौप्रहरति॥
एवंसर्वत्रैवमाज्यसंस्कारःस्मार्तवद्भवति॥सर्वत्रआदिष्टस्थानेषुतत्रतत्रस्रुहुया
त्॥अधिदेवनेस्रुहोतिरथमुखेस्रुहोतिचतुष्पथेस्रुहोतिवर्मनिस्रुहोतिआवस्थने

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

प्रा० जुहोति॥औदुंबर्यांजुहोति॥उत्तरवेदीयेजुहोति॥आग्नीध्रीयेजुहोति॥गार्हपत्येजुहो प्र०
अ तीत्यादिष्टस्तानि॥अनादिष्टआहवनीयएवहोतव्यं॥सर्वत्रआदिष्टकर्तरितेनहो तेन
तव्यं॥नेष्टाजुहोतिप्रतिप्रस्थातृजुहोतीत्येवमादीत्यादिष्टकर्तृकाणि॥अनादिष्ट
कर्तर्यध्वर्युमेवकर्तारंप्रतीयात्॥यत्रयत्रपात्रंनिर्दिष्टंतत्रतत्रतेनैवजुहुयात्॥अं
जलिनाजुहोतिशूर्पेणजुहोतिस्रुवेणजिनएष्टेनजुहोतिमध्यमेनपर्णेनजुहोति॥
अर्कपर्णेनजुहोतिस्रुवेणजुहोतिध्रुवयाजुहोतिइत्येवमादीन्यादिष्टपात्राणि॥
अनादिष्टपात्रेजुह्वैवजुहुयात्॥यत्रयत्रग्रहणसंख्याक्रियतेतत्रतत्रग्रहणसंख्यया
दायजुहुयात्॥चतुर्गृहीतेनजुहोतिद्वादशगृहीतेनजुहोतीत्येवमादीन्यनादिष्टग्रहण
संख्यानि॥अनादिष्टग्रहणसंख्यानेसकृद्ग्रहणमिष्यते॥आधानेप्रथमप्रयोगेप्रकां
२ तेसंकल्पानंतरंपत्न्यामनालंभुकायांप्रकांतेप्रयोगमुत्सृज्यआदित्यारभ्यकालांत २

रेआदधीतअग्न्याधानदक्षिणादानात्पूर्वंयदिकदाचिदानालंभुकावानभवतितदाप्रयोगंउत्सृज्यआ
दित्यारभ्यकालांतरेआदधीतदक्षिणादानात्परतश्चैत्सैष्टिकमाधानंसमापयेत्॥बहुपत्नीकस्या
पिसंकल्पादूर्ध्वंदक्षिणादानात्पूर्वंयस्यांकस्यांचिदानालंभुकायांप्रयोगमुत्सृज्यआदित्यारभ्यका
लांतरेआदधीत॥दक्षिणायाउर्ध्वंचेदग्न्यंतरंयासमापनं॥संकल्पप्रभृतिपूर्णाहुतेःप्रागनालंभुका
यांउत्सृज्यकालांतरेआदधीत॥पूर्णाहुतेःपरतोनालंभुकाचेदपरुध्यसमापयेदितिकश्चिदाह॥द्वि
तीयाधानेतुसंकल्पात्परतोनालंभुकायामपरुध्यैवसमापयेत्॥आधानसंकल्पात्प्रागनालंभुकामे
कामपिविहायाधानसंकल्पंनकुर्यात्॥सोमपूर्वाधानेदर्शपूर्वाधानेचदक्षिणायाउर्ध्वमनालंभुका
यामपरुध्यसैष्टिकमाधानंसमापयेत्॥अग्निहोत्रारंभंदर्शपूर्णमासारंभंचानकुर्यात्॥चतुर्थहनित्या
नानंतरंनयासहअग्निहोत्रारंभंदर्शपूर्णमासारंभंचकुर्यात्॥शुद्धिकालपर्यंतमग्नियुत्सर्थमग्निहोत्रा
णिसायंप्रातर्जुहुयादितिकेचिदाहुः॥समाप्तायामग्निहोत्रारंभंकुर्वन्कालातिक्रमप्रायश्चित्तंमनसचिंती
हुत्वाग्निहोत्रारंभंकुर्यात्॥इष्टिपूर्वाधानेकालातिक्रमप्रायश्चित्तार्थमन्वारंभेष्टिपूर्वकंपाथीक
तीमिष्टिंकृत्वानंतरंपर्वणिदर्शपूर्णमासारंभंकुर्यात्॥आधानाहोरात्रएवादीसंभारासंभरत्या

धानसंकल्पं कुर्यात्॥ अश्वत्थाच्छमीगर्भात्केवलादश्वत्थाद्वारणीपरिग्रहीयात्। प्राग्दग्गतामुद्
ग्गतांवाश्वत्थशाखापर्वकालक्षितांप्राग्दग्गतांनिपात्यचतुर्विंशत्यंगुलप्रमाणांवाक्षित्वासमंपार्श्व
मित्वोपरिभागमुत्तरारणिमधोभागमधरारणिंकुर्यात्॥ चतुर्विंशत्यंगुलयामांहादशांगुलविस्तारां
चतुरंगुलोत्सेधमुत्तरारणिमधरारणिंचकुर्यात्॥ अपिवाषोडशांगुलयामांहादशांगुलविस्तारांच
तुरंगुलोत्सेधमुत्तरारणिमधरारणिंचकुर्यात्॥ अपिवाप्रादेशमात्रांसर्वतःसमांचतुरंगुलोत्सेधा
मेवाधरारणिमुत्तरारणिंचकुर्यात्॥ अधरारण्यामूलभागेंगुलद्वयमुत्कापार्श्वयोस्त्रीणित्रीण्यंगुला
न्युत्सृज्योत्तरादेवयोर्निम्नमध्येकुठाराग्रेणतत्रमंथनंकुर्यात्॥ उत्तरारण्यामूलभागेऽष्टांगुलप्रमा
णेषडंगुलप्रमाणंवाप्रथममंथनशाकलंछित्वातीक्ष्णंकृत्वाषोडशांगुलप्रमाणंखादिरमंथनदं
डमुषिरेप्रमंथनशाकलंमूलतःकीलयित्वामंथनप्रदेशेनिधायखादिरेणषोडशांगुलप्रमाणेनाप
कीलितेनप्रमंथनदंडेनोपरिपीडयित्वामंथेत्॥ अरणिःक्रिमिदष्टाचेत्पुत्रहानिदा॥ ग्रंथियुक्ताचे
त्पत्नीहानिदा॥ आपाटिताचेद्दुःखदा॥ सुषिराचेद्यजमानहानिदाभवति॥ अतःसुषिरादिदोषरहि
तेपरीक्षितलक्षणेगृह्णीयात्॥ उषादीनांसंभाराणांछेददाहमेध्यादिभिरुपघातेएकदेशस्यकृ

ल्लस्यवानाशेनज्ञातीयंतत्परिमाणंतदूर्ध्वंतदूर्ध्वंतन्नेत्रेणगृहीत्वातत्तत्स्थानेसादयित्वाज्यंसंस्कृ
त्यत्वमग्नेअयासि॥ घृतापतदित्यनाभ्यांब्रह्मोदनार्थंगौरीकेवाहुतीर्जुहुयात्॥ एकैकस्यनाशेसर्वेषां
वानाशेसार्वमंत्रेणसंस्कृत्यएतास्केवाहुतीर्जुहुयात्॥ गोपितृयज्ञार्थंगौरौकिकारणिभ्यांमथित्वा
दक्षिणाग्न्यायतनेनिदध्यात्॥ अथवाग्नेर्वियोगादाहृत्यनिदध्यात्॥ निहितमग्निंपरिसमुहपरि
स्तीर्याज्यंसंस्कृत्यसुर्वंसंस्कृत्याग्नौसमिधमाधायाग्निसंस्कारार्थंपुनस्त्वेतिस्रुक्वाहुतिंजुहुयात्॥
सर्वत्रहोमेषुपरिस्तरणंपर्युक्षणंअग्नौसमिधादानंप्रज्वालनमलंकरणंएतत्रयंचकंहोमेकुर्या
त्॥ नासमिकेजुहुयाद्यद्यसमिकेजुहुयाद्यद्यदिङ्मन्त्रमघातादकानस्मात्समिद्धोवैहोत
र्यग्निमितिकंवचनात्समिधमाधायैवहोतव्यंसर्वत्रैवसमाधायहोतव्यमित्याचार्यवचनात्प्रज्वाल्यै
वहोतव्यं॥ सर्वेषुहोमेषुग्न्यायतनानिपुष्पैरलंकुर्यात्॥ तत्रस्रुकपुष्पैरलंकरणंमुख्यंतदभावेजप
पुष्पाण्यारक्तानिवर्जयित्वासर्वैःपुष्पैरलंकुर्यात्॥ गोपितृयज्ञार्थंग्नेरुद्वयतःप्रकृतिसंभारानाहृत्य
याहतीर्जुह्वाःसमस्ताःश्रुक्सुहुयात्॥ अग्नेरौल्मुकनाशेतत्एवपुनरौल्मुकमाहृत्यौल्मुकाग्नौ
दक्षिणाग्नौचयस्मिन्याहतीर्जुहुयात्॥ गोपितृयज्ञार्थंसंभाराणांनाशेपुनरुत्पाद्यगोपितृयज्ञाग्नौ

त्वमग्नेअथासिप्रजापतेरितिहेस्रुवाहुतीर्जुहुयात्॥ब्रह्मोदनार्थस्थालीमेदेनिमोघर्मइतिभ्रांस्था
लीमग्निमंत्र्यघर्मोदेवानित्यंत्र्यांस्थालीनिधायभ्रामपात्रप्रक्षिप्यसर्वप्रायश्चित्तंब्रह्मोदनामौजुहु
यात्॥ब्रह्मोदनार्थाग्निःसर्वौषधिहोमात्सर्वमनुगतश्चेल्लौकिकान्निर्मथ्याहार्यंमाहृतश्चेत्तथैव
पुनरुत्पाद्यअयाश्चाग्नेइत्येतयापुनःसंधायसर्वौषधिहोमादिकुर्यात्॥औपासनाग्निःसर्वोब्रह्मो
दनार्थमाहृतोनष्टश्चेद्दग्ध्वाश्चेल्लौकिकाग्नौपुनःसंधानंकृत्वासर्वौषधिहोमादिकुर्यात्॥पर्वमौ
पासनाग्निरर्थआहृतोनष्टश्चेत्पुनरौपासनाद्वामानीयसर्वप्रायश्चित्तंकृत्वासर्वौषधिहोमादिकुर्या
त्॥सर्वौषधिहोमादूर्ध्वंभ्रामावुद्धृतेपर्ववदुत्पाद्यसंधायसर्वौषधिहोमादिकृत्वाब्रह्मोदनंपचेत्॥
ब्रह्मोदनपाकादूर्ध्वंसमारोपणात्सर्वमनुगतेपर्ववदुत्पाद्यसर्वौषधिहोमादिकृत्वाब्रह्मोदनपा
कादिवरदानांतंकुर्यात्समारोपणादिकुर्यात्॥संवत्सरादिपक्षेषुब्रह्मोदनाग्नौबहुकृत्वोऽद्वा
तेपर्ववदग्निमुत्पाद्यसर्वौषधादिपुनःपुनर्ब्रह्मोदनंपचेत्॥मथनादनंतरंजातोग्निरुद्वासश्चेत्प्रयो
गमुत्सृज्यआदित्यआरभ्यकालांतरमादधीत॥गार्हपत्याधानात्सर्वंसूर्योदयेसतिप्रयोगमुत्सृ
ज्यकालांतरमादधीत॥तनूहविषांसमासेःसर्वंगार्हपत्यवद्वातेप्रयोगमत्सृज्यादित्यआरभ्यकालांत

रमादधीत॥दक्षिणाग्नौआहवनीयेचआधानप्रभृतिपूर्णाहुतेःसर्वमनुगतेपिप्रयोगमुत्सृज्य
कालांतरमादधीत॥पूर्णाहुतेरूर्ध्वंतनूहविषांसमासेःसर्वंदक्षिणाग्न्याहवनीययोरनुगमेगार्ह
पत्यमेवमंत्रैराधायचाहुतिभिःसर्वौषधिहोमादिविराजकर्मोपस्थानांतंकुर्यात्॥आहवनीयएव
पूर्णाहुतिंसौमाग्निहोत्रंचकुर्यात्॥आधानादुपरिसमासेःसर्वंदक्षिणाग्न्याहवनीययोरनुग
मेपुनरन्वाधायचाहुतिभिरुपनिषेत्॥अग्न्याधेयस्यासमासेःसभ्यावसथ्ययोर्नाशेआहवनी
यात्सर्ववदाधायसर्वौषधाद्यपस्थानांतंकुर्यात्॥सभ्यावसथ्ययोर्दक्षिणाग्नेश्चाग्नामनिर्मथ्यो
निक्षेपेपर्यंतंउत्पाद्यपर्ववदाधायसर्वौषधाद्यपस्थानांतंकुर्यात्॥समारोपणानंतरमरण्योर्ना
शेउपघातेऽपहारेवासतिप्रयोगमत्सृज्यआदित्यआरभ्यकालांतरमादध्यात्॥पूर्णाहुतेःपू
र्वंयस्यकस्यांगस्याकरणेपूर्णाहुत्यनंतरंत्वंनोअग्नेसत्वंनोआग्नइत्येताभ्यामाहवनीयेहेस्रु
वाहुतीर्हुत्वाऽग्नेयेप्रायश्चित्तंपूरितिगार्हपत्येयजुर्भेदेप्रायश्चित्तंभवत्याहेतिदक्षिणाग्नौ॥ग्राम
भेदेसतिवरित्याहवनीयेजुहुयात्॥आधानसंकल्पादूर्ध्वंयजमानस्यवरणादूर्ध्वमृत्विजांवाजा
तायाशौचसंभवेस्नात्वाप्रकीर्णकर्मकुर्यात्॥समापयेदेवंसर्वत्रव्रतानामृत्विजांयजमानस्यवा

स्वमेरेतोविसर्गेइमंमेवरुणेतत्वायामीत्येताभ्यांहुत्वाजुहोतीर्हुत्वापुनर्मामैत्विंद्रियमित्यनुवाकंजपेत्॥ यजमानःस्वदारगमनेव्रातपतीमिष्टिंकुर्यात्॥आहिताग्नेर्यदाकदाचिदजुह्वित्पर्वकंअन्यस्त्रीगमनेव्रतभ्रष्टिंविधायसत्यंकृप्रायश्चित्तंकुर्यात्॥आहवनीयाद्यानकालेमेघादिनास्तूर्योनाविर्भवतिचेदुद्वयंतमसउदुत्यंचित्रमितितिस्रःसुवाहुतीर्जुहुयात्॥आधानपवमानेस्योर्मध्येसूर्याचंद्रमसोर्ग्रहणेप्येतदेवप्रायश्चित्तं॥उल्कानादक्षिणांमभावेवासांस्येवतावंतंददात्॥मंथानेओदनान्येतावंतोददात्॥क्षीरमिश्राज्यमिश्राअणवःसक्तवोमंथाः॥एकांगामपिदक्षिणांदद्यात्॥अशक्तश्चेदानंसर्वथाकुर्यात्॥नत्वेवानाहिताग्निःस्यादित्याचार्यवचनात्॥नानाहिताग्निर्निष्क्रियेतिश्रुतिवाक्याच्चसतिद्रव्येहीनंकल्पंनकुर्यात्॥नचाग्निमनुःसतिद्रव्येनकुर्वंतंहीनंकल्पंफलाप्रदमिति॥आधानदक्षिणार्थमश्वंददात्॥अश्वंदत्वादातास्वश्वप्रतिग्रहेष्टिंकुर्यादितिकेषांचिन्मतं॥प्रतिग्रहीतुरिष्टिरित्यन्येषांमतं॥प्रयोगः॥अश्वप्रतिग्रहेस्यायस्येइतिसंकल्पः॥वरुणायचतुःकपालंपुरोडाशंनिर्वपेत्॥इमंमेवरुणेतत्वायामीतियाज्यानुवाक्ये॥वरुणस्योत्तंदेवंधर्मणाग्नरयासंपुरोडाशंभक्षंजंसंतिष्ठते॥एकाश्वप्रतिग्रहप्रतिग्रहीतुर्वैश्वानरीष्टिःप्रायश्चित्तंपुरुतदितिप्रतिग्रहीत्यश्वंपुरुतदितिर्वचनात्॥यद्यपरमश्वंप्रतिग्रहीयात्सौर्यमेककपालमनुनिर्वपेदितिअपराश्वप्रतिग्रहेस्यायस्येइतिसंकल्पः॥वरुणायचतुःकपालंनिरुप्यसौर्यमेककपालमनुनिर्वपेत्॥उदुत्यंचित्रमितियाज्यानुवाक्ये॥सूर्यस्यांहंसुदर्शीकः॥अतःपरंयावंतोश्वान्प्रतिग्रहीयात्तावंतोवारुणांश्चतुःकपालान्निरुप्यैकमतिरिक्तंनिर्वपेत्॥एवमश्वप्रतिग्रहेष्टिंसमाप्यावभृथेकुर्यात्॥मुष्टिंवेदंवरुत्वावरुणायैककपालंपुरोडाशंनिरुप्यहुत्वाअवभृथेष्टिंकृत्वापुनरेत्यअपोनप्रीर्यंचरुन्निर्वपेत्॥इष्टयायस्येइतिसंकल्पः॥अपांनप्रेनुवंनिर्वपामीतिचरुंनिर्वपेत्॥अपांनपादाह्यस्तादुपस्थंसमन्यायंतीतियाज्यानुवाक्ये॥अपांनतुरहंप्रजयापुनरागंभवर्जसंतिष्ठते॥आधानानंतरंदैवान्मानुषाद्वापराधाद्वलवद्विरोधादकालेदर्शपूर्णमासावनारभ्यैवनदाशांतेविरोधेआगामिन्यांपौर्णमास्यांविघ्नेकर्यमन्वारंभणीयांकृत्वाविघ्नेष्टिंकृत्वादर्शपूर्णमासार्थमन्वारंभणीयांकृत्वापौर्णमासेनयजेत्॥एवमाधानानंतरंस्वकालेपरेसंवत्सरेप्रथमपशोरकरणेविघ्नेष्टिंकृत्वापशुनायजेत्॥प्रथमायनस्यारंभेविघ्नेष्टिंकृत्वायनेनयजेत्॥अनारब्धानादर्शपूर्णमासायनेपशूनांप्रायश्चित्तंवैकल्पिकमिति

द्वैधेदर्शितं॥प्रथमदर्शेपत्न्यांरजस्वलायांपिंडपित्र्ययज्ञारंभंनकुर्यात्॥पिंडपित्र्ययज्ञारंभलोपप्राय
श्चित्तार्थंपाणिसंमर्शनात्पूर्वंसमिष्टयजुषःपूर्ववदर्शा॥याहवनीयेसप्तहोतारंजुहुयात्॥अनंतरे
दर्शेपिंडपित्र्ययज्ञारंभंकुर्यात्॥अग्निहोत्रारंभकालेग्निहोत्रमनारभ्यचेत्तदापरेद्युःसायंकालेसप्त
होतारंमनस्वतींचरुत्वाग्निहोत्रारंभंकुर्यात्॥इतिप्रायश्चित्तप्रदीपेआधानप्रकरणंसमाप्तं॥॥अथा
ग्निहोत्रप्रायश्चित्तमुच्यते॥तत्रप्रथममग्न्युद्गमनप्रायश्चित्तं॥कर्मकालेगार्हपत्यउद्धृतेयजमानप
त्नीग्न्याधानवारेध्वर्युःप्रोषितेयजमानेयत्यन्वारब्धःपत्न्यामनालंभुकायामध्वर्युःअध्वर्यौप्रेषि
तेयजमानःगार्हपत्यायतनेअयंतेयोनिरित्यग्निमाहरणीसंस्पर्शनंसमारोपणं॥अदृश्यरूपोग्निर
रण्योर्विशतीतिबुध्यासंस्पर्शनंसमारोपणं॥एवंसमारोप्यमंथेत्॥मंथनंजातोग्निरुद्धातश्चेत्स
मारोपणमंत्रंजप्त्वापुनर्मंथेत्॥मथ्यमानोग्निर्यदिनजायेतविहरणकालश्चप्राप्तस्तदायत्राक्यंपश्येत्त
त्राहृत्यहोतव्यमितिवचनाल्लौकिकाग्निमाहृत्यगार्हपत्यायतनेनिधायअंतर्वेदिरणीनिधायमंत्रे
णगार्हपत्याद्ग्निहृदयंविहृत्यतेषुग्निहोत्रंजुहोति॥यदिमंथनस्यावसरोनविद्यतेतदामंथनारंभंक
त्वालौकिकाग्नावग्निहोत्रंजुहुयात्॥होमानंतरमग्नीनुत्सृजेत्॥लौकिकेग्निहोत्रहोमेनउपप्रयंतेयजमानस्य

इष्टिपशुंकुर्यात्॥लौकिकाग्निहोत्रहोमदिनेनान्नंवदेत्॥इत्यादीनिव्रतानिकर्तव्यानिदर्शपू
र्णमासौलौकिकाग्नौकुर्याच्चेत्तुमत्याइष्ट्यापुनःकुर्वीतहोमार्थंविहृतेषुयदुपप्रयंतेयजमानस्य
लौकिकेनविद्यते॥लौकिकाग्निहोत्रहोमेत्रेयोधिकारिणःनष्टसर्वाग्निरंकः॥सर्वदाप्रयाणशीलो
परः॥अग्नीनांरक्षणेमंथनेवाऽसमर्थोन्यः॥एतेत्रयोपिसमारूढाग्नयः॥अग्निषुसमारूढेषुअंत
रेप्रायश्चित्तंनेष्यते॥लौकिकमपचलनमानंवागस्यदक्षिणेकर्णेजुहोति॥वागंगंसंनम
क्षयेत्॥वागभावेब्राह्मणदक्षिणेहस्तेहोतव्यं॥गृहागतंब्राह्मणमश्नादिनिःसृजयेत्॥ब्रा
ह्मणाभावेदर्भसंवेहोतव्यं॥दर्भैरश्नादीनिचनकुर्यात्॥दर्भाभावेशून्यहोतव्यं॥अपांगहोन
कुर्यात्॥एतानिव्रतानिसंवत्सरपर्यंतंयावज्जीवंवा॥यदिबहुरुत्वालौकिकेऽग्नावालस्यादि
नाग्निहोत्रेहुतेमनस्वतींतंतुमतीष्टिःप्रायश्चित्तं॥इष्ट्वायष्ट्वइतिसंकल्पःअग्न्याधानादि
अग्नयेतंतुमतेऽष्टाकपालंपुरोडाशंनिर्वपेत्॥तन्नस्तंतुस्वयंरूएवानइतियाज्यानुवाक्ये॥
अग्नेस्तंतुमतोहमन्नादः॥एवंलौकिकाग्नावग्निहोत्रंकृत्वामंथेदितःप्रथमंजातमित्यादिना॥जात
मुपतिष्ठते॥इषेत्वेयेरमस्वेतिनंप्रज्वालयेत्॥सारस्वतौत्वौसवितेति॥एतत्त्रयंमंथनस्यारू

त्याऽऽहुत्येनऽमंथितमग्निंगार्हपत्यायतनेनिधायदक्षिणमाहवनीयंचप्रणीयपूर्ववद्याज्यंसंस्कृ
त्यचतुर्गृहीतंगृहीत्वाऽऽहवनीयेमनसातीऽकृत्वागार्हपत्येसर्वहोत्रुभिःप्रत्येकंचतुर्गृहीतानिजु
होति।अग्निस्कृन्निदश्राहोता॥एथिवीहोतेनिचतुर्होता॥अग्निर्होताद्यंचहोता॥षऽऋतावाग्घो
तासऽसहोतामहाहविर्होता॥एतैर्होत्रुभिःसमग्रैर्हुत्वापुनश्चतुर्गृहीतेनदक्षिणाग्नौचतुर्होता
रंपुनश्चतुर्गृहीतेनाहवनीयेपंचहोतारंकृत्वापुनश्चतुर्गृहीतेनयजमानेनान्वारब्धआहवनी
येदश्राहोतरंमनसानुकृत्यजुहुयात्॥सर्वत्रहोत्रमंत्रैःसग्रहाअग्रहावाऽग्रहपक्षेस्वाहांते
र्होमः॥ग्रहाश्चदश्राहोतुर्वाचस्यतेविधेनाग्निनि॥चतुर्होतुःवाचस्यतेवाचोवीर्येणेति॥पं
चहोतुःसोमःसोमस्यपुरोगाइति॥षष्ठीहोतुर्भूर्भुवःस्वरिति॥सप्तहोमुर्वाचस्यतेविधेनाम
ग्निमिस्र्येनइतिषट्होतापायश्चित्तेषुनेष्यते॥सायावसथ्ययोरेकैकस्मिन्होत्रुजुहुयात्॥
दश्राहोत्रहोमानंतरंप्रदक्षिणमाच्छ्यगार्हपत्येदश्रात्मसंज्ञितब्राह्मणएकहोतेत्यनुवाकोक्तै
र्दश्राग्निर्मंत्रैर्दश्रात्मकवाहुतीर्जुहुयात्॥एवंगार्हपत्येसर्वहोत्रहोमादिदश्रात्मकहोमानंतंसर्वा
ग्निनाश्रापायश्चित्तं॥दक्षिणाग्निरनुगतश्चेद्गार्हपत्यानंप्रणीयदक्षिणाग्नौचतुर्होतारंकृत्वा

गार्हपत्येदश्रात्मकंजुहुयात्॥आहवनीयोगतश्चेत्तंप्रणीयआहवनीयेपंचहोतारंगार्हपत्येद
श्रात्मकंचजुहुयात्॥सायावसथ्ययोर्नाशेआहवनीयातौप्रणीयसर्वान्होहनुभयोर्हुत्वाहव
नीयेदश्रात्मकंचजुहुयात्॥दक्षिणाग्नेर्ग्रामनिर्मंथ्ययोनिपक्षेस्वयोनितउत्पाद्यदक्षिणाग्नौचतु
र्होतारंजुहुयात्॥गार्हपत्येनदश्रात्मकोहोमः॥सायावसथ्ययोर्ग्रामनिर्मंथ्ययोनिपक्षेस्वयोनि
नउत्पाद्यतयोःसर्वान्होत्रूजुहुयात्॥आहवनीयेनदश्रात्मकोहोमः॥विहरणानंतरंगार्हपत्य
उद्धृतेआहवनीयेदक्षिणाग्निंचोद्धाप्यगार्हपत्यायतनेमंत्रेणभस्मनारणीसंस्पृश्यइतःप्रथ
मामित्याद्यनामंथनादिकृत्वागार्हपत्येनिधायतस्माद्दक्षिणाग्निमाहवनीयंचप्रणीयाज्यंसंस्कृ
त्याहवनीयेमनसातीऽकृत्वागार्हपत्येसर्वहोहनुत्वाऽऽहवनीयेदश्राहोतारंकृत्वादक्षिणाग्नौ
चतुर्होतारमाहवनीयपंचहोतारंगार्हपत्येदश्रात्मकंजुहुयात्॥दक्षिणाग्निनाशेगार्हपत्या
नंप्रणीयदक्षिणाग्नौचतुर्होतारंकृत्वादश्रात्मकंगार्हपत्येजुहुयात्दक्षिणाग्नेर्ग्रामनिर्मंथ्य
योनिपक्षेयोनिनउत्पाद्यदक्षिणाग्नौचतुर्होतारंजुहुयात्॥गार्हपत्येनदश्रात्मकोहोमः॥
विहरणानंतरंहोमात्पूर्वमाहवनीयोऽनुगतश्चेद्यथोद्धरणंनेष्यमंथेत्तज्ज्ञानीया

रणीभ्यांवाभस्मसमारोपेतःप्रथममित्यादिमंथेत्॥तज्जातीयारण्यभावेनित्यारणीभ्यांमंत्रेण भस्मसमारोप्यमंथनाद्यमपित्वाहवनीयायतनेनिधायमनस्वतींकृत्वापंचहोतारंजुहुयात्॥ यद्वाआहवनीयेग्निहोत्रेआहवनीयेनुगतेगार्हपत्यात्प्रणीयेतःप्रथममित्यादिमंत्रत्रयंजप्त्वाहवनीये पंचहोतारंकृत्वागार्हपत्येदक्षात्मकंजुहुयात्॥मंथनपक्षेगार्हपत्यात्प्रणयनपक्षेचाहवनीयानु गतिप्रायश्चित्तार्थंज्योतिष्मतीमिष्टिंकुर्यात्॥ अग्नयेयविष्ठायेतिसंकल्पः॥अग्न्याधानादि॥ अग्नयेज्योतिष्मतेऽष्टाकपालंनिर्वपेत्॥उदग्नेभुवयस्त्वमित्यादिनिविदनुवाक्ययाज्यानुवाक्ये॥अग्नेर्ज्यो तिष्मतोहमन्नादः॥इत्यनुवाक्यायाज्यानुवाक्याभ्यांपरिधीनुतिंजुहुयात्॥यद्वाअग्नयेज्योतिष्म तेस्वाहेतिस्रुवाहुतिंजुहुयात्॥ततस्तिष्ठेवाग्निहोत्रंजुहुयात्॥सायंसायंवसथ्ययोर्नाशेआहवनी यात्तौप्रणीयतयोरेकैकस्मिन्सर्वान्होहन्कृत्वाहवनीयेदक्षात्मकंजुहुयात्॥सायंवसथ्ययोर्ग्रा मनिर्मंथ्ययो॥निपक्षेयोर्नित्यनैमित्तिकयोःसर्वान्होहन्जुहुयात्॥आहवनीयेनदक्षात्मकहो मः॥गार्हपत्याहवनीययोर्युगपद्विनश्यतस्तदादक्षिणाग्निमुद्धाप्यगार्हपत्यभस्मसमारोपणा
८ दिकृत्वामथित्वागार्हपत्यायतनेनिधायतस्मादग्निहयंप्रणीयसर्वनाशोकप्रायश्चित्तंकुर्या ८

त्॥दक्षिणाग्नेर्नित्यनैमित्तिकपक्षेनोद्धापनं॥गार्हपत्यदक्षिणाग्न्योरनुगमेआहवनीयमुद्धा प्यगार्हपत्यभस्मसमारोपणादिकृत्वामथित्वागार्हपत्यायतनेनिधायतस्मादग्निहयंप्रणीय सर्वनाशोकप्रायश्चित्तंकुर्यात्॥दक्षिणाग्न्याहवनीययोर्नाशेगार्हपत्यादुत्तरंविहृत्यदक्षि णाग्नेश्चतुर्होतारमाहवनीयेपंचहोतारंकृत्वातंत्रेणगार्हपत्येदक्षात्मकंजुहुयात्॥आह वनीयेज्योतिष्मतीइष्टिःकर्तव्या॥ ॥[illegible]॥अजस्रपक्षे सर्वाग्न्यनुगमेआयतनेभ्योमंत्रेणभस्मनारणीक्रमेणसंस्पृश्यतःप्रथममित्यादिनाम थित्वागार्हपत्यायतनेनिधायतस्मादक्षिणाग्निमाहवनीयंचप्रणीयाज्यंसंस्कृत्यसर्वना शोकप्रायश्चित्तंकुर्यात्॥आहवनीयेस्थितेगार्हपत्येनुगतश्चेदाहवनीयंदक्षिणाग्निं चोद्धाप्यगार्हपत्यभस्मसमारोपणमंत्रक्रमेणमथित्वागार्हपत्यायतनेनिधायदक्षिणाग्नि माहवनीयंचप्रणीयसर्वनाशोकप्रायश्चित्तंकुर्यात्॥यद्वाआहवनीयेस्थितेगार्हपत्येनुगते गार्हपत्याङ्गारानादायशकलोयेगार्हपत्यायतनेपरिलिप्याहवनीयंसङ्गारानादायद क्षिणेनविहारमाहृत्यगार्हपत्यायतनेनिधायाहवनीयायतनंशकलोयेनपरिलिप्यगा

र्हपत्यात्तं प्रणीयप्रज्वाल्यकोक्तिस्मिधमाधायाज्यंसंस्कृत्यषट्कृत्वाहुतीर्जुहुयात्॥उद्बु
ध्यस्वाग्ने॰त्वमग्नेसप्रथाऽसि॰मनोज्योति॰तंतुतन्वन्॰उदुत्यं॰चित्रंदेवानामितिषट्भिः॥त
तोगार्हपत्येसर्वान्होहून्जुहुयात्॥षट्कृत्वाहुतीरेवजुहुयादित्यन्ये॥गार्हपत्याहवनी
ययोःसहनाशेदक्षिणाग्निमुद्धाप्यद्वयोर्भस्मसमारोपणंकृत्वामंथनाच्चतोमथित्वा
गार्हपत्यायतनेनिधायतस्मादग्निहृदयंप्रणीयगार्हपत्येसर्वान्होहून्हुत्वादक्षिणेचतुर्होता
रमाहवनीयेपंचहोतारंकृत्वागार्हपत्यदक्षिणाग्न्योरन्तरेणजुहुयात्॥गार्हपत्यदक्षिणाग्नो
रन्तरमेआहवनीयमुद्धाप्यगार्हपत्यदक्षिणाग्न्योर्भस्मसमारोपणंकृत्वामथित्वागार्हप
त्यायतनेनिधायतस्मादग्निहृदयंप्रणीयसर्वनाशोक्तंप्रायश्चित्तंकुर्यात्॥दक्षिणाग्न्याहव
नीययोरन्तरमेगार्हपत्यादुनयंप्रणीयदक्षिणेचतुर्होतारंआहवनीयेपंचहोतारंकृत्वा
गार्हपत्येतंत्रेणदक्षाग्निकंजुहुयात्॥सर्वेष्वग्निषुचरुगतेष्वसमारोपितेषुहृदयाग्नयोर्यदि
स्यातांतत्राग्न्याधेयंप्रायश्चित्तं॥गार्हपत्याहवनीययोर्नाशेसतिदक्षिणाग्नौविद्यमाने
उदयास्तमयोर्यदिस्यातांनतत्राधानमिष्यते॥दक्षिणाग्नेर्ग्रामयोर्निपक्षेपुनराधा ९

नंकेचिदिच्छंति॥यजमानस्यनष्टेसतिनंतंपूर्ववदुत्पाद्योदितेसौअपादानभूतेचरु
कालेचरुसमस्तव्याहृतिभिर्जुहुयात्॥यजमानेनष्टेउत्पादितेसौअपादानभूतेजुहूमि
दाहुतीर्जुहुयात्॥अथास्तंदग्निनाशेएकंद्वौबहूनपियथोक्तमुत्पाद्यजुहूचतुर्गृही
तज्यमनस्त्यऽहवनीयेजुहुयात्॥नान्यत्रवापादानकार्यविभागः॥अन्याधिश्रय
णार्थान्नाजुह्वानेयोनितउत्पाद्याहवनीयमनस्त्यजुहुयात्॥पित्र्यमेधार्थाग्नीनामनुग
मेहृदयोरेकस्यवासर्वहौकविनाशोक्तेहोत्रादीनामन्यतमेनप्रायश्चित्तंकुर्यात्॥क्षीरद्रा
हादारभ्यसंसृष्टानांनाशेभस्मसमारोपणाद्याच्यामथितासर्वान्होहून्जुहुयाद्वाहृत्वा
दिग्निर्वा॥॥इत्यग्न्याधानप्रायश्चित्तं॥॥अथहतेपूर्वाग्नावास्त्यौपासनेदर्शेणहिरण्यबधा
प्रतीच्यांदिशिलंबयित्वादक्षिणाग्निंप्रणीयआहवनीयार्थमग्निंहरतिवैभृत्यपात्रासादना
निकृत्वाग्निहृदयंमंत्रेणपरिषिच्यहविःश्रपणादिदर्शहोत्रादित्येतदंतंकृत्वादर्शेणाचहिरण्य
गृहीत्वापरिकर्म्यगतोगच्छतितमन्वग्बहुविद्वाह्मणोवाचात्वेत्यग्निमादायगच्छति॥अन्व
ग्निहोत्रमादायाध्वर्युर्गच्छतिभरद्भुवःस्वरित्यादिनाहवनीयंगत्वाचहरत्यग्निहोत्रंप्रहा

यहिरण्यमाहवनीयायतनेनिधायाहवनीयमंत्रेणाग्निंनिधायसमंत्रंपरिषिच्यमंत्रेणाग्नि
होत्रहवणीकूर्चंसादयित्वामंत्रेणसमिधमाहवनीयेनिधायातमितोःप्राणानायम्यपुनःस
मंत्रंजुहुयात्॥अग्निर्ज्योतिरित्यादि॥सिद्धमांतंकुर्यात्॥तेषाग्निषुपुनर्विहृत्यवावरूत्रिंकु
र्यात्॥इष्टायष्टयइतिसंकल्पः॥वरुणायजुष्टंनिर्वपामीतिचरुंनिर्वपेत्॥इमंमेवरुणत
त्वायामीतियाज्यानुवाक्ये॥वरुणस्याहंप्रप्रजयाचेति॥पूर्वमाग्नावनुद्धृतेआदित्योदयेसति द
क्षिणाग्निंप्रणीयाहवनीयार्थमग्निधारावादोविभज्याज्यंसंस्कृत्यजुहूंचतुर्गृहीतंगृहीत्वा
पात्रासादनानिकृत्वाग्निंहृदयंपरिषिच्यहविःश्रयणादिदर्शहोत्रोद्देशंतंकृत्वाचतुर्गृहीतमा
ज्यंपरिक्रम्यहस्तेदत्वायतोनयतितमन्वाहुर्विद्वान्त्सोग्निमादायगच्छतिनमन्वगध्वर्यु
रग्निहोत्रमादायाहवनीयंगत्वाज्यंस्रुवंचप्रदायचतुर्गृहीतमाज्यंस्रुवासहनिधायाहवनीयमंत्रे
णाग्निंनिधायपुरस्तात्प्रत्यङ्मुखउपविश्यचतुर्गृहीतमाज्यमाहवनीयंजुहोतिज्ञषाःकेतु
नाषतामितिमंत्रेणाग्निंपरिषिच्याग्निहोत्रंमंत्रेणकूर्चंसादयित्वामंत्रेणसमिधमाधा
यातमितोःप्राणानायम्यपुनःसंमंत्रंजुहुयात्॥स्वर्ज्योतिरित्यादिसिद्धमांतात्॥तेषग्नि

षुपुनर्विहृत्यवाग्नित्रंदेवत्याग्निंकुर्यात्॥इष्टायष्टयइतिसंकल्पःमित्रायजुष्टंनिर्वपामीतिच
रुंनिर्वपेत्॥अग्नीषोमाहिनादेवंप्रसमित्रमतोअस्कृधीतियाज्यानुवाक्ये॥मित्रस्याहंप्रपद्यजयाचेति॥
अथवानुद्धृतेपूर्वाग्नौरात्रावस्तमितेपूर्ववदग्निंप्रणीयाग्निहोत्रंकृत्वाआज्यंसंस्कृत्य
मनोज्योतिः॥त्रयस्त्रिंशादितिमंत्राभ्यांद्वेस्रुवाकृतीकृत्वाभूर्भुवःसुवरित्याहवनीयमुपतिष्ठते॥
यद्वाअनुद्धृतेपूर्वाग्नौरात्रावस्तमितेपूर्ववदग्निंप्रणीयाग्निहोत्रंकृत्वावरुणायत्वाहेतिस्रुवाकृ
तिंकृत्वाचाहेतिमिरुपतिष्ठतेनाअनुद्धृतेचपूर्ववदग्निंप्रणीयाग्निहोत्रंकृत्वामित्रायत्वाहेतिस्रुक
वाकृतिंकृत्वाचाहेतिमिरुपतिष्ठते॥दक्षिणाग्नावनुद्धृतेरात्रावस्तमितेभ्यःकृतेचदक्षिणाग्नि
प्रणीयचाहेतिमिरुपस्थानमेवनान्यत्॥सर्वत्रप्रायश्चित्तेष्टीनांस्रुवाकृतिर्वाकार्या॥॥इ
त्यनुद्धरणप्रायश्चित्तं॥विहरणप्रभृतिहोमोपस्थानपर्यंतंयजमानोव्रतचारीभवेत्॥
यजमानःपत्नीचाग्निहोत्रागारेविहरणप्रभृतिहोमसमाप्तिपर्यंतंवसेत्॥अग्निहोत्रपयो
दोहनार्थंस्थापितागौर्यदिनिषीदतितामुत्थापयेत्॥उदस्थाद्देवीतिरितिमंत्रेणोत्था
प्यउद्ग्याग्निहोत्रंकृत्वातत्रप्रायश्चित्तंमनस्वतीकुर्यात्॥चतुष्पदेष्टायदिनिषीदतितांमे

त्रेणोलूखलमुष्ट्वापयसासहब्राह्मणायदद्यात्॥अतर्ह्यर्ध्वंतस्यान्नंनाद्यात्॥अन्यांदुग्ध्वा
ग्निहोत्रंजुहुयात्॥अस्मिन्होमकालायजमानपत्न्योरुपवासोमनस्वतीहोमश्च॥दुह्यमानं
पयोयदिस्कंदेत्॥स्कन्नमग्निमंत्रयेतयदद्यदुग्धमिनिस्कन्नयोपरिजलंसिंचेत्॥स्कन्नशोष
णकथंचनाग्निहोत्रंकुर्वातेषेवाग्निष्वन्यांदुग्ध्वापुनरग्निहोत्रंजुहुयात्॥मनस्वतीहोमः॥
अन्यकालेदुपवासश्च॥एतत्स्कन्नप्रायश्चित्तंदर्शहोतोदेत्येतदंतंयदाकदावास्कंदति त
दाकुर्यात्॥प्रातरग्नीत्यादिवेद्यासादनपर्यंतंयत्रयत्रस्कंदतितत्रतत्राग्निहोत्रस्थालीं
निधायस्रुवेणाग्निमादायस्कन्नमग्निमंत्रयेतस्थाल्यामुपदोहंनिनीयपुनरुन्नीयाग्निहोत्रंते
ष्वेवाग्निष्वन्यांदुग्ध्वापुनरग्निहोत्रंजुहुयात्॥मनस्वतीउपवासश्च॥वेद्यासादनादिहो
मपर्यंतंयदिस्कंदेत्स्कन्नमग्निमंत्र्योपदोहंनिनीयोन्नीयाग्निहोत्रंकृत्वातेषेवाग्निष्वन्यां
दुग्ध्वापुनरग्निहोत्रंजुहुयात्॥मनस्वतीउपवासश्च॥वेद्यामासादनादिहोमपर्यंतंकुर्या
न्मनस्वतीउपवासश्च॥अग्निहोत्राहुत्योरग्नेरन्यत्रयदिक्षरेत्कृतस्यनाशोवायदिभि
न्नदारुकगतशोषेणपुनराहुतिंकृत्वातंस्रुवस्थमग्नयेस्विष्टकृतेजुहुयात्॥अग्निहोत्रेधिश्रिते

कृत्वान्यांदुग्ध्वापुनराहुतीरुपवासश्च॥पूर्णाहुतेर्हुतायांयदुत्तराहुतिःस्कंदेत्पूर्वाहु
त्याभिदार्हुत्वाजुहुयात्॥यदग्नेरंजुहोति।तदाग्नेयत्वेलवनस्पतइतिमंत्रेणाहवनीये
समिधमादायस्कन्नमग्निमंत्र्यस्कंदनशोषणोत्तराहुत्वान्यांदुग्ध्वापुनर्होमोमनस्वत्युपवा
सश्च॥सर्वत्रोपवासअपलंबमनाहुतेः॥पूर्णाहुतेर्हुतायामाहवनीयोनुगच्छेत्तदारौ
दारावग्निरितिवदन्नाकलेहिरण्येनिधायोत्तराआहुतिंजुहुयात्पुनराहवनीयंप्रणीयाग्नि
नाप्रायश्चित्तंकृत्वान्यांदुग्ध्वापुनर्जुहुयात्।मनस्वतीच॥अत्रपुनर्होमंकेचिन्नेच्छंति॥स
र्वत्राहुतिमात्रस्यस्कंदनेप्रायश्चित्तमिष्यते॥आहुतिप्रमाणंचाद्रवद्रव्यस्कंदनेबिलपरिण
पर्यंतंस्रुवबिलंचांगुष्ठपर्वप्रदेशानपर्यंतंकठिनद्रव्याणांत्वंगुष्ठपर्वमात्रस्कंदनेप्राय
श्चित्तं॥यदाहुतिमात्रंतद्भिप्रुषेवभस्मन्यग्नौहविर्द्रव्येवेद्यांस्तीर्णेवबर्हिषि॥कुर्वेविप्रस्य
पाणौवास्कन्नदोषोनविद्यते॥॥अग्निहोत्रेधिश्रिते॥श्वाअंतरेणायदिगच्छेत्गार्हपत्या
दुल्मादायदेवस्रुविचक्रमेइतिमंत्रेणाहवनीयपर्यंतंभस्मनापुनःपदंप्रक्षाल्यमनस्व
तीकृत्वाग्निहोत्रंजुहुयात्॥मार्जारवराहमूषकादिभिरंतरागमनेहादशरात्रंहीनेनस्रु

चंपरयित्वाजानवेदसेसुनवामसोमंमनोज्योतिरितिद्वाभ्यांमहाव्याहृतिभिरितिदुर्गादिग
एंचजुहुयात्मनस्वतींचपुरुषादिभिरंतरागमनेप्येतदेवप्रायश्चित्तं॥अनोरथोवांतराग्नी
गच्छेदाहवनीयमुद्वास्यगार्हपत्यादिध्मादायायदग्नेपर्वमितिमंत्रेणाहवनीयंनिधायत्वम
ग्नेसप्रथाअसिजुष्टोहोतावरेण्यत्वयायज्ञंवितन्वतेइत्याहवनीयमुपस्थायमनस्वतींकृत्वा
पथिकृतेष्टिंकुर्यात्॥इष्ट्वायक्ष्यइतिसंकल्पः॥अग्न्याधानादिअग्नयेपथिकृतेष्टाकपा
लंनिर्वपेत्॥अग्नेनयसुपथारायेत्यनुवाक्ये॥अग्नेःपथिकृतोहमन्नादःऋतुम
ध्येअनोवारथोवांतराग्नीगच्छेत्तुंसमाप्याहवनीयमुद्वास्येत्यादिकृत्वापथिकृतीमिष्टिं
कुर्यात्॥दक्षिणायाआत्मानंचयानिहवींषिकामेवादक्षिणायावाद्येपतानिस्युर्ना
नाहवींष्येतानिजानीयाद्यदिवाजपेयेरथांतरगमनेनदोषःतंत्रमध्यपतितानामिष्टीनां
कपालनात्रोरष्टिवत्प्रयोगः॥अग्निहोत्रेअग्निहोत्रंपयस्तापाऽऽहुतेविष्पंदेत्॥पयआदा
योऽदइत्यवल्मीकवपायांप्रजापतेनत्वदेतानीतिहुत्वाऽऽर्ष्टुवस्रुक्स्थंपस्त्यायांचाऽऽ
ग्घ्यपुनर्जुहुयात्॥मनस्वतींच॥अग्निहोत्रार्थंपयोयदिकिंचिदुच्छिष्टंस्यात्तत्पयोमध्येमनो

DR BHAU DAJI

तिमेनयाचलात्रापर्णेनमहीद्यौःपृथिवीचनइत्यंचोऽतःपरिधिदेशेनिनीयान्यांऽउग्घ्यापु
नर्जुहुयान्मनस्वतींचऽअग्निहोत्रार्थंपयोयद्यवनष्टंस्यात्तत्पयोमित्रोजनान्येतिमंत्रेणाहुतिं
हुत्वान्यांऽउग्घ्यापुनर्जुहुयात्॥मनस्वतींच॥अग्निहोत्रस्रुवालीस्रुवंतीमग्निमंत्रयतेगर्भस्रुवं
तमग्नादमकरितिस्रुवादिनासंदध्यात्विधुंदद्राणमितिमनस्वतींजुहुयात्॥अग्निहोत्रस्रु
वालीमित्रावेतत्स्रुवानेन्यांस्रुवालींनिधायाग्निमंत्रयेतत्तरायुर्मेधारयतप्राणंमेधारयतेति
द्वाभ्यांगृहीतेनस्रुचंपरयित्वाऽउर्गादिगएंनजुहुयात्॥मिदादिगएंनवा॥प्रायश्चित्तंहुत्वा
ऽग्नावग्नुप्रक्षिपेत्॥अग्निर्भूमिमगादितिस्वयंस्रुवमयानांपात्राणांनेदनएवंप्रायश्चित्तं॥
स्वयंस्रुवमयानांपात्राणांनेदनादौतत्स्रुवानेन्यंनिधायतुरायुर्मेइत्यग्निमंत्र्यऽउर्गादिगएंहुत्वाग्नि
न्नेदारुमयंपात्रंऽअग्निर्भूमिमगादित्याहवनीयेनुप्रहरेत्॥अग्निर्द्रोद्रंगधीत्याग्यवस्रुवसुह
विषःस्कंदनादिदोषसंभवेतनद्यवस्रुवानदेवतायैहुत्वान्यांऽउग्घ्यापुनरग्निहोत्रंजुहुया
त्॥मनस्वतींच॥अग्निर्ऋषिर्नमेध्येनदुष्येद्वेदधिश्रयणार्थंगार्हपत्यस्त्रीनिनीयान्यांऽउग्घ्या
पुनर्जुहुयान्मनस्वतींच॥प्रायश्चित्तंहविरमेध्येनयद्यापद्येतपर्याग्नेःसमिधंक्षिप्त्वातस्मा

दुदगुल्मगस्मनिरूह्यतस्मिन्नग्नीविनीयाग्न्याधुग्ध्वापुनर्दुकुयान्मनस्वतीं च। अनंतरं दर्वीकेषुत्रि
ष्वन्याभावेऽपदोहनाग्निहोत्रंजुहुयात्॥ सर्वेष्वग्निषुप्रयत्नवत्सु नाप्रज्वलितेषुउद्दीप्यसजातवे
दःमनोहिंसीज्जातवेदइत्यारण्यकमन्त्राभ्यांस्वयंप्रज्वलितेग्नौहुत्वासमिधेक्षित्वासर्वप्रायश्चित्तंजु
हुयात्॥ व्याहृतीनांसर्वप्रायश्चित्तमितिसंतः॥ अनापदिलौकिकेग्नावग्निहोत्रहोमरुतेअल्प
विद्यैरविद्वैःकन्यायाःपत्न्याःकृतेपत्न्याविहतेपि॥ नानग्नीन्याहुतिमिर्विहत्यमनस्त्यापूर्णा
तिंकृत्वातंतुमतीमिष्टिंकुर्यात्॥ पक्वार्थाग्नावनुगतेयोनिनष्टत्याग्निहोत्रादीनामन्यतमे
नप्रायश्चित्तंकुर्यात्॥ कूर्चैपरिस्तरणादीनांदाहादौएकदेशस्यकृत्स्नस्यवानाशेपूर्ववदन्य
त्कृत्वातत्स्थानेनिधायत्वमग्नेअयासीप्रजापतइत्येताभ्यांस्रुवाहुतीर्जुहुयात्॥ अग्निहोत्र
विषयेसर्वत्रअनादिष्टस्थानेमनस्वतींजुहुयात्॥ कर्मकालेकालांतरेवागार्हपत्याद्यन्य
तमोग्निःग्राम्याप्रासादवाग्यदिनिर्गच्छेन्नदा॥ इदंतएकमितिमंत्रेणांगारंस्वस्थानेप्र
क्षिप्यमनस्वतींजुहुयात्॥ ग्राम्याप्रासादूर्ध्वंयदिनिर्गच्छेद्यस्याग्नेरंगारोयत्रनिर्गतस्तत्रत
१२ स्याग्नेरायतनंकृत्वातदनुगुणंविहारंकल्पयित्वाग्नींस्तत्रनिधायमनस्वतींकृत्वापाथि १२

कृतीमिष्टिंकृत्वासापूर्वमेवोक्तांसमाप्यतत्रैकमहर्वसेत्॥ श्वोभूतेगृहंप्रवेक्ष्यन्॥ ॥य
जमानःपत्नीवोभौउदयास्तमितवेलायामग्निसकाशेवसतः॥ यजमानस्यान्यपरत्वेपत्न्यवश्यं
वसेत्॥ पत्न्याःकार्यांतरपरत्वेयजमानोवश्यंवसेत्॥ यदिपत्नीयजमानश्चसहोदयास्तमय
वेलायां॥ बालकसीसंग्रामसीमांवाविनिष्क्रम्यवसतांतदाग्नयोलौकिकाभवंति॥ अविरु
तमग्न्याधेयंकुर्वीत॥ [illegible]कायनःविहायाग्नीन्सभार्यश्चेत्सीमामुल्लंघ्यगच्छंति॥ हो
मकालात्यपेतस्यपुनराधेयमित्यतइतिउदयास्तमयश्चेतिरिक्तकालेपिनयोर्महासीमा
तिक्रमणंकेचिन्नेच्छंति॥ [illegible]चिन्नमादौपक्षहोमंकृत्वात्रिषट्कृदादिनान्येकत्रवस्त्रिवाप्र
यास्यन्वासोध्यतीयांकृत्वाजस्रैःसमारोप्यवांप्रयायात्॥ [illegible]रणेपक्षेगार्हपत्यस्यैवसमा
रोपणं॥ अजस्रपक्षेत्रयाणांरोपणं॥ दक्षिणाग्नेर्भिन्नयोनित्वेपथगरणीभ्यांसमारोपणं॥
सभ्यावसथ्ययोस्तथैवा॥ समाजस्रानग्नीन्हरंतःग्राम्याप्रासादवाङ्नोल्लुसेयुः॥ यदु
ल्लुसेयुरग्नयोलौकिकाभवंति॥ [illegible]न्याधानंप्रायश्चित्तं॥ [illegible]प्रासादूर्ध्वंहरणेनुल्लुप्ते
नदोषः॥ अजस्रहरणेसमारोपहरणेचयजमानःपत्नीवान्वारंभाभावेऽग्नयोलौकिका

भवंति तत्राग्न्याधानं प्रायश्चित्तं ॥ अरण्यविषयेऽवश्यमन्यतरेणान्वारंभः कार्यः । समारोपणाद्व
रणोर्यत्तेयोनिर्ऋत्विमद्ग्नय इत्यरण्योः समारोपणं ॥ आत्मसमारोपणपक्षेयजमानो । यातेअग्नइति
मंत्रेणत्रिस्त्रिरेकैकंजिघ्रति तदात्मसमारोपणं । अरण्यपक्षेगार्हपत्यस्यैवत्रिर्जिघ्राणं ॥ आ
त्मनिसमारूढेष्वग्निषु नाश्नुनिमज्जेत्तन्मैथुनं व्रजेत् ॥ अमेध्यश्चद्रादिस्पर्शेअन्वाधानाचरणेचा
ग्नयोलौकिकाभवंति । अग्निषुदीप्यमानेषुसमारूढेषुचारण्योः । शूद्रवायसपतितरासभरज
श्चलासस्तिकाचंडालस्पर्शमेध्यादिभिःस्पर्शनेऽग्नयोनश्यंति । वसाशुक्रास्थिमज्जास्रं
त्रविट्कर्णविड्नासाश्लेष्मश्वपतिकास्वेदोदशैतेऽरणिमलाः ॥ एतैश्चस्पर्शनैरग्निनाशः
तत्राधानं प्रायश्चित्तं । अग्निषुनरेष्वरण्योर्नाशेआधानमेवप्रायश्चित्तं ॥ अग्नीन्रजस्वलाचे
त्संस्पर्शेदग्निहोत्रकुंडेइष्टिरष्टाकपालेनकार्यातुष्टुवयेग्नये । इतिकेचिद्रजस्वलास्पर्शे
इष्टिरेवनाग्न्याधानमितिकेचित् । विच्छिन्नाग्नेरपहताग्नेःसमारूढेषुनश्यारणीकल्पचका
लोनावेक्ष्यः ॥ निमित्तानंतरमेवगोपितयज्ञंसंकल्प्यकृतिंवरणाद्यविकृतमन्याधानं
कर्तव्यं ॥ ॥ सर्वत्रप्रायश्चित्ताधानानंतरंअतिपन्नास्यमग्निहोत्रहोमास्सर्वान्पक्षहोम
विधानेनसमस्यतदानीमिवसवेदादिनाच्यवधानंकृत्वापुनर्विहृत्यसर्वान्प्रातर्होमान्समस्य

जुहुयात् ॥ अतिपन्नहोमात्पूर्वंमनस्वतीहोमंतंतुमतीष्टिंकृत्वातियज्ञाग्निहोत्रहोमान्कृत्वाकालेऽ
ग्निहोत्रंजुहुयात् । चतुर्थाद्यतिक्रमप्रायश्चित्तार्थंमन्वारंभणीयांकृत्वातिपन्नयागार्हपत्यकुंडे
श्वानर्योसमानंत्रेप्रतीष्टयर्थंसरुद्राकृत्वानंतरमतिपन्नंदर्शपूर्णमासंवाकुर्यात् ॥ केवलाऽ
रणीनाशेभवतेनःसमनसाविरूपहनारणीअक्षक्षिपेन्नसमारूढेष्वग्निष्वरण्योरमेध्यादिभि
रल्योपहतौ । मथित्वाग्नीन्विहृत्य । त्रिहविष्कापवमानेष्टिःकर्तव्याऽन्यायक्ष्यऽतिसंकल्प्या
ऽग्नयेपवमानायाऽग्नयेपावकायाऽग्नयेशुचयेऽष्टाकपालान्पुरोडाशान्निर्वपेत् ॥ अग्न
आयूंषिपवसेऽग्नेपवस्वाऽग्नेपावकसनःपावकाग्निःशुचिव्रततमऽइन्नुवयंत्वेतिया
ज्यानुवाक्याः । त्रयाणामप्यभ्यादः ॥ ॥ अग्नीनांविष्टादिभिरल्योपहतौयेनकेनाप्यारणे
नाग्नीनांदौर्बल्येसतिसमारोप्यमथित्वाग्निहविःपवमानेष्टिःपूर्वोक्ताकार्या ॥ सर्वत्राग्नी
नामल्योपहतौपुनस्तेतिसमिधादानंपुनस्तेतिस्रुवाहुतिश्च ॥ समारूढेष्वरण्योरल्योप
हतौमथित्वाग्नीन्विहृत्यमनस्वतीजुहुयात् ॥ आत्मनिसमारूढेषुअपांसनादौकृतेअ
रण्योरुपावरोहमंथेत् । अथलौकिकाग्नौवोयावरोहविहृत्यमनस्वतीजुहुयात् ॥ ॥

[illegible]॥ यजमानः पत्नीवाग्नीन्विहाय संवत्सरमतिक्रम्य प्रवसेद्यदि तदा तयोः पवित्रेष्टिः प्रा॰
प्रायश्चित्तं॥ अग्निहोत्रहोमे पयसा नित्यहोमः॥ पयोऽभावे व्रीहिभिर्यवैर्वा होमः॥ तयोरभा
वे श्यामाकादिभिरारण्यैस्तेषामभावे॥ तैलं दधि पयः सोमो यवागूरोदनं घृतं तंडुला
मांसमापश्चेदमाद्रव्याण्यनुक्रमात्॥ इत्येतेषामन्यतमेनजुहुयात्॥ दर्शाधिश्रयणेना
ज्याज्यतैलयोः परिषिंचनस्थानेदमाग्रहायणेषु पेत॥ ओदनपक्षेसिद्धमोदनमानीयजु
हुयात्॥ यवागूंतत्रैवश्रपयेत्॥ तंडुलानांमांसादीनांचअधिश्रयणेसेचने॥ व्रीह्यादीनां
द्रव्याणामभावे मंत्रजपः॥ यजमानपत्न्योरसमक्षंपुत्रादिनाऽग्निहोत्रंनहोतव्यं॥ द्वयोरथ
समक्षंकृतमकृतंभवेदितिकात्यायनवचनात्॥ अग्नीनामुद्वासनस्यकालःपुरादित्यास्ता
पुरोदयाच्चापुरादित्यास्तमयापुरादित्यस्योदयादित्याचार्यएतत्॥ विहरणानंतरमुद
यास्तमयौयथाभ्रुतःतथाविहरेत्॥ अधिरक्षस्सूर्यआविःसूर्यचेत्यापस्तंबेनोक्तो
उदयास्तमयाभ्यांपूर्वमुद्वासनस्यकालः॥ अग्निहोत्रहोमस्योदयानंतरमस्तमयानंतरंच
१५ मुख्यकालः॥ सायंप्रदोषांतःप्रातःसंगवांतोमुख्यःकालः॥ सायंहोमस्यसवनिशागौ १५

णकालः॥ प्रातर्होमस्यसर्वमहर्गौणकालः॥ आपत्कृगौणकालेपिकुर्वन्प्रायश्चित्तेनाचरेत्॥
अनापदिगौणकालेनकुर्यात्॥ कुर्याच्चेद्यथोक्तंकालंप्रायश्चित्तंकुर्यात्॥ सूर्यास्तस्यसायंच
तुर्थीभागःप्रदोषः॥ दिवसस्याद्यश्चतुर्थीभागःसंगवः॥ सायंहोमस्यगौणकालातिक्रमेसा
यंदोषावस्तनंमःस्वाहेतिस्रुवाहुतिंहुत्वातिक्रांतमग्निहोत्रंहुत्वा॥ कालेग्निहोत्रंजुहुयात्॥
प्रातर्होमस्यगौणकालासैव॥ प्रातर्दोषावस्तनंमस्वाहेतिस्रुवाहुतिंहुत्वातिक्रांतमग्निहो
त्रंहुत्वाकालेग्निहोत्रंजुहुयात्॥ उभयत्रमनस्वतींकृत्वाऽग्निहोत्रंजुहुयात्॥ द्विरग्निहोमाद्य
तिपत्तौमनस्वतींतंतुमतीष्टिश्चप्रतिहोमंप्रायश्चित्तं॥ एकाहाद्यग्निहोत्रातिपातनेतंतुम
तीमिष्टिंकृत्वाऽतीतहोमान्परिसंख्यायपक्षहोमविधानेनकुर्यादित्यपरः॥ दीक्षितस्या
षण्मासादिदंप्रायश्चित्तं॥ दीक्षाग्नेःषण्मासमहर्तेग्निहोत्रेहविःचतुष्काइष्टिःकार्या॥
इष्ट्वायक्ष्यइतिसंकल्पः॥ अग्न्याधानादि॥ अग्नयेपथिकृतेग्नेयंतंतुमतेग्नयेवै
श्वानरायाग्नयेव्रतपतयेपुरोडाशान्निर्वपेत्॥ तत्रवैश्वानरोद्वादशकपालः॥ इतरे
ऽष्टाकपालाः॥ वैश्वानरोनर्त्वा॥ एष्टोदिविएष्टइतिवैश्वानरस्यत्वमग्नेव्रतपाइ

सियहोवयँमग्निनामव्रतानिइतिव्रतपतेः॥सर्वेषामन्नादः। वैश्वानरस्यसुविःपत्नीमेध्योवि
पाप्माब्रह्मवर्चस्यन्नादोरय्यासमिति वा॥एवमिष्टिंकृत्वातीतहोमान्परिसंख्यायपक्षहोम
विधानेनकृत्वाप्रातमग्निहोत्रंजुहुयात्॥दीक्षाग्नेःसंवत्सरपर्यंतमग्निहोत्रहोमेएतामिष्टिं
कुर्यात्॥इष्ट्यायक्ष्यइतिसंकल्पः॥अग्नयेपवमानायअग्नयेपावकायाग्नयेशुचयेग्न
येपथिकृतेग्नयेतंतुमतेग्नयेवैश्वानरायाग्नयेव्रतपतयइतिसप्तपुरोडाशान्निर्वपेत्॥
अत्रापिवैश्वानरोद्वादशकपालः॥इतरेषांकपालाः॥याज्यानुवाक्याश्चपूर्वमेवोक्ताःकृ
तानुमंत्रणंचोक्तंइतीष्टिंविधायैतीतान्होमान्परिसंख्यायपक्षहोमविधानेनकृत्वा
प्रातमग्निहोत्रंकुर्यात्॥समारूढाग्नेरग्नेकाहाग्निहोत्रानारंभेतंतुमनीष्टिंकृत्वा
प्रतिहोमंमनस्वतीत्वप्रायश्चित्तं॥षण्मासाग्निहोत्राकरणेचतस्रःइष्टीःकुर्यात्॥प्र
थमायामग्नयेष्टाकपालंनिर्वपेत्॥द्वितीयायामग्नयेपवमानायाष्टाकपालं॥तृती
यायामग्नयेतंतुमतेष्टाकपालंचतुर्थ्यामग्नयेपथिकृतेऽष्टाकपालंनिर्वपेत्॥चत
स्रणांयाज्यानुवाक्याःपूर्वमेवोक्ताः॥कृतानुमंत्रणंच॥एवंचतस्रइष्टीःकृत्वातीतहोमा

न्परिसंख्यायपक्षहोमविधानेनकृत्वाप्रातंजुहुयात्॥प्रोषितेयजमानेएकाहाद्ग्निषग्नि
होत्रहोमेमनस्वतीतंतुमनीष्टिंप्रायश्चित्तंकुर्यात्॥प्रजमानःप्रवासोपस्थानमकृत्वा
यदिगच्छेत्तदासायमग्निहोत्रोपस्थानकालेउदङ्मुखःविहारात्तिमुखोवाइहैवसंतत्र
संतेतेअग्नेइत्यनेनोपस्थायनित्येनोपप्रयंतोअध्वरमित्यनेनोपतिष्ठेत्॥एवंप्रत्यहंउ
पप्रयंतोअध्वरमित्यूपस्थायपुनरागत्यममनामनवचेत्यूपस्थानंकुर्यात्॥॥अथा
ग्निहोत्रसंसमासः॥राष्ट्रविभ्रमेव्याधिपीडायांअध्वगमनप्रसंगेगुरुकुलावासापे
क्षायांमातपितृकलत्रपुत्राद्यर्थेबलवतानिरोधादेशकालद्रव्यानुपपत्तौचत्यै
तापस्कअग्निहोत्राणांसमासः॥अग्निहोत्रनिमित्तेषुयदाकदाचासायमग्निहोत्रहो
मानुसमस्यकृत्वातदानीमेवसंवेशनेनवा।निमीलनेनवानुपसमाधानेनचयथाविधानं
कृत्वापुनर्विहृत्यप्रातरग्निहोत्रहोमानुसमस्यजुहुयात्॥अनग्निपातिनिमित्तेषुमावा
स्येनेष्वापतिपदिसायंपंचदशानुगृहीतान्यूपरशकलानिचतुर्दशावाद्वितीयायां
प्रातश्चतुर्दशात्रयोदशावाचतुर्गृहीतान्यूपकपरिशकलानितिथिवद्विकासवशात्॥

तत्रप्रयोगः॥अग्निहोत्रमास्मस्यहोष्यामीतिसंकल्पः॥विहरणादिकृत्वापक्षतिथिसं
ख्ययाऽवच्छिन्नतिथिसंख्यया॥चतुर्गृहीतानिगृह्णानि॥रूचिरण्यामन्यस्मिन्पात्रेर
क्षीयात्॥एकासमित्प्रथमाकृतिरेकाद्वितीयाकृतिश्चसरुवप्रक्षालनसरुतापनिमार्ज
नंच॥एवमेवैकैकपक्षावधिसमासःपक्षांतरेनसंक्रमयितव्यंऽमावास्यातिथेरर्धैक
कलपक्षेसमासःप्रतियत्मातःपर्यंतंशुक्लपक्षेसमासः॥निमित्तसंभवायासमासेकृतेपिनि
मित्तभावेसतिसमासस्याकृतसमत्वेनपुनरग्निहोत्रकालेहोमःकार्यः॥आपत्स्वपिपूर्व
पार्वणेष्ट्योर्नप्रतिकर्षः॥पक्षमध्येपिनिमित्तसंभवेत्रीषहोमान्समस्येत्॥आलस्यनलो
भेनाथद्वयावापक्षहोमान्समस्येत्॥अन्यदिपक्षहोमकरणेतंतुमतीष्टिःप्रायश्चि
त्तंपक्षादौपक्षमध्येवरात्रौमध्यंदिनेपिवा॥निमित्तसंभवेहोमान्समस्येत्समहसेचतु।
अनापद्यग्नीन्सर्वथानोत्सृजेत्॥अपत्स्वग्नीनुत्सृज्यनोत्सर्गेष्वपत्स्वुत्सृजेत्॥अन्यदिनेचतायां
पुनराधानंकृत्वातंतुमत्यायजेत्॥अग्नीनांलौकिकाग्निसंसर्गेऽन्याग्निसंसर्गेपरस्परसं
सर्गेतान्मनस्येवप्रायश्चित्तं॥अन्याग्नेष्वन्यःस्वाग्निबुध्यायजेतसोरण्योरग्निंसमारोप्यो
दवसायमथित्वाग्नीन्विहृत्यमनस्वतींजुहुयात्॥द्विहविष्कामि

ष्टिंकुर्यात्॥इष्ट्वायक्ष्यइतिसंकल्पः॥अग्नयेविविचेऽग्नयेव्रतपतयेपुरोडाशंकपालेपुरोला
शौनिर्वपेत्॥विनेविष्वक्कृत्वाग्नेमानुषीरीलतेविश्वानिविविचायाज्यानुवाक्येत्वमग्नेव्र
तपाअसियद्वोवयंप्रमिनामव्रतानीतिव्रतपतेःद्वयोरप्यन्वादेशः॥अग्निसंसर्गेऽग्नयेपथिरु
तेपुरोडाशंकपालंनिर्वपेदित्येके॥इदंप्रायश्चित्तंकृथाग्निसंसर्गेऽन्याग्निसंसर्गेचैवंपरस्परसंस
र्गेतत्रमनस्येवप्रायश्चित्तं॥अन्याग्नेष्वन्यःस्वाग्निबुध्यायजेतसोरण्योरग्निंसमारोप्यो
दवसायमथित्वाग्नीन्विहृत्यद्वादशकपालंवैश्वानरंनिर्वपेत्॥याज्यानुवाक्येनैकैकुना
नुमंत्रणंचाग्नेर्यमुद्वहताग्नेरुपरिपुनरन्वार्यमुद्वरणंकृतेतत्रप्रायश्चित्तं॥इष्ट्वायक्ष्य
इतिसंकल्पः॥अग्नयेग्निवतेपुरोडाशंकपालंपुरोडाशंनिर्वपेत्॥अग्निनाग्निसमिध्यतेत्वंह्य
ग्नेअग्निनेतियाज्यानुवाक्ये॥अग्नेरग्निवतोहमन्वादेशः॥यमुद्वहताग्नेरुद्वहनंनोक्त्वात
दर्थमेवपुनरुद्वहनंप्रायश्चित्तंनविद्यते॥अग्निहोत्रंयावज्जीवंविधानाज्जरयाव्याधि
नावाऽशक्तोवाग्निहोत्रंकर्तुमशक्नुवन्यजमानो॥यातेअग्नेयज्ञियातनूरित्यात्मसमारो

पणंकुर्यात्॥प्रणयनपक्षेगार्हपत्यमेवसमिर्जिघ्रेत्॥अजस्रपक्षेत्रयमपित्रिस्त्रिरेकैकंसमाजि
घ्रेत्॥एवमात्मनिसमारूढेषुनरवादेनपिबेत्नोपरिशय्यायांशयीतनाक्ष्णिमज्जेत्॥न
मैथुनंव्रजेत्॥इत्येतदनापद्विषयं॥आपदिमज्जनमैथुनेनिषिद्धेनियमातिक्रमेमनस्वतीमें
त्रजपःप्रायश्चित्तं॥अग्निहोत्रहोमकालद्वयेप्रक्षालितपाणिपादोयजमानोपआचम्यप्राङ्मु
खउपविश्याग्निहोत्रद्रव्यंहोममंत्रेणप्रथममल्पंभक्षयित्वाप्रजापतिंमनसाध्यायन्तूष्णीं
योभक्षयेत्॥अग्निहोत्रविषयेतिजीर्णआशरीरपातादेवंकुर्यात्॥व्याधिपीडितोदरिद्र्यश्च
व्याधिदारिद्र्यक्षयेगमेऽग्नीनुपावरोहेज्जातवेदइत्युपावरोह्यपुनःकालेकालेग्निहोत्रंजुहु
यात्॥प्रवत्स्यन्यजमानोऽग्नीनुपस्थायप्रवसेत्॥यजमानेग्निसमीपस्थेसतिपत्न्यपिप्रव
सेत्॥यजमानःपत्न्यासहनप्रवसेत्॥बहुपत्नीकोप्येकयासहनप्रवसेत्॥अस्तुपायी
प्रवसतीतियोयंप्रोषितस्त्रीनिषेधःसक्रमाप्तद्वास्त्रीविषयः॥यदिपत्नीसीमांतेपुनरा
धानमितिभारद्वाजवचनेचप्रोषितभर्तृकाविषयं॥यजमानःपत्नीचौभौग्रामांतःसीमां॥
१८ बहिःसीमांवातिक्रम्ययदिप्रवसतस्तदाग्नयोलौकिकाभवंतितदाग्न्याधानंप्रायश्चित्तं॥ १८

अग्निष्टेनस्या

प्रोषितेयजमानेराष्ट्रविभ्रमादिप्रवासनिमित्तोत्पन्नौपत्नीअग्निभिःसहप्रवसेत्॥तत्रक्र
मः॥अथर्युःपक्षहोमक्रमेणाग्निहोत्रहोमान्समाप्यहुत्वाग्निहोत्रोपकरणमक्षपात्रादिकंस
र्वंसमारोप्यदक्षिणमनड्वाहंयुक्त्वाज्यंसंस्कृत्यतावन्मात्रोपयोगिन्यापूर्णम्यामुक्त्वाचतुर्गृहीतमा
ज्यमाहवनीयेजुहोति॥वातोप्यतेप्रतिरेनएधिद्विपदेचतुष्पदे॥वास्तोष्पतेशग्मयासदानः
स्वावेशेजुहुयात्॥ऋचोर्नप्रणवसंधानंस्रुचमाहवनीयेप्रक्षिप्यसत्यंयुक्तायंतेयोनिरित्यच
रण्योरग्नीन्समारोप्यअजस्रपक्षेत्रयाणांरोपणं॥प्रणयनपक्षेगार्हपत्यस्यैवसमारोपणंएवं
समारोप्यारणीशकटेनिधायपत्न्यपिशकटमारुह्याभिलषितदेशंगत्वातत्रविहारंकृत्वाग्नी
नामथित्वाग्नीन्विहृत्याज्यंसंस्कृत्यासनस्रुक्चतुर्गृहीतमाज्यंहुत्वातंतुमतीमिष्टिंकुर्यात्॥
सापूर्वमेवोक्ता॥शरावंदक्षिणंदद्यात्॥एकौदनंपर्याप्तमन्नंशरावं॥अथयद्यरणीजीर्णा
स्यात्तर्जनुर्मथनकार्यक्षमेस्यात्तदग्निनेष्टेपहतेवाभवतस्तदानतुत्सेधायामविस्तार
ज्ञात्वायैःपूर्वारण्योःसमैर्यैरनुपयुक्तैर्नलक्षणलक्षितैकार्यक्षमैर्नवैरन्यैररणीसं
पाद्यामावास्यायांप्रातरग्निहोत्रंहुत्वा॥श्वस्त्वाद्रव्यवाहाद्विजातइतिमंत्रोभ्यारणीआ

ह्त्यग्न्याधानादिकृत्वोपोष्यश्वोभूतेदर्शेनेष्ट्वाजीर्णेरणीश्चकलीकृत्य गार्हपत्येप्रक्षिप्य प्र
ज्वाल्यनवेअरणीदक्षिणोत्तरपाणिभ्यांदक्षिणेनोत्तरारणिंसव्येनाधरारणिंआदायगार्हप
त्यायोनि त्यामेरुपरिधारयन्नजपतिर्बहुध्यस्याग्निप्रविशास्वेनेमितिसौत्रंमंत्रमुक्त्वाऽयंनेयोनिरितिमंत्रे
णनवारण्योःसमारोपणइतःप्रथमामित्यादिकृत्वागार्हपत्यायतनंशकुनोयेनोपलिप्यायतने
ग्निनिधायाग्निहृदयंप्रणीयमनस्वतींकृत्वातंतुमग्निहोत्रिंकुर्यात्॥सर्वमेवोक्तम्॥एवमेवयदाय
दारणीर्जीर्यात्तांनदाकुर्यात्॥सर्वत्रअन्वाहार्येणदक्षिणायासमुच्चयः॥अनुक्तदक्षिणानांप्रा
यश्चित्तेहीनांहिरण्यंदक्षिणांदद्यात्॥अन्वाहार्यणसमुच्चयः॥अनुमध्येयद्यरणीर्जीर्येत्या
तामुपहत्यैवातदानीमेवनवेअरणीमाहृत्योपहतारणीमप्रक्षिप्यतंनःसमनसा
वितिजीर्णेशकलीकृत्यप्रक्षिप्येत्यादितंतुमतींहिंकुर्यात्॥अग्निषुसमारूढेषुधरारणिःका
र्याक्षमाचेदुत्तरारण्यईमधरारणिंकृत्वामंथनंकुर्यात्॥उत्तरारणिःकार्याक्षमाचेदधरा
रण्यईमुत्तरारणिंकृत्वामंथनंकुर्यात्॥समनंतरकालएवनवेअरणीमाहरेत्॥अग्निषुस
१९ मारूढेषुभयोःकार्याक्षमत्वेपुनरग्न्याधानंकुर्यात्सर्वत्रविहितहोमकर्मकालस्यादिनानकु १९

र्यात्॥सूर्योदयात्सर्वेविहितानियानिकर्माणितेषामकरणेहिवासमापनीयानांकर्माणांचा
समापनेएतेषुमनस्वत्याचतुर्गृहीतहोमःप्रायश्चित्तं॥सोदरेज्येष्ठेविवाहार्हेविद्यमानेयश्चि
यमुद्वहत्सपरिवेत्तातस्यज्येष्ठःपरिवित्तिःतस्मैयःकन्याप्रयच्छतिसपरिदानः।ज्येष्ठस्तेवि
वाहार्थंयःकन्यांनिश्चिनोतिसप्राग्दाहकर्मणःपरिनिदानउच्यतेऽयंज्येष्ठस्तेम्याधा
नंकरोतिसपर्याधानः॥ज्येष्ठस्यकपर्याहितः।ज्येष्ठस्तेनेयःसोमेनयजेतसपर्यष्टाज्येष्ठस्यकप
रीष्टः॥एतेषांसमाप्तकर्मप्रायश्चितानंतरंमनस्वतीहोमश्चप्रायश्चित्तं॥यस्सोमंवमतिससोम
वामी॥यश्चसोमंविरेचयतिससोमातिपर्वितः॥भक्षणकर्मणायःसोमंनभक्षयतिससमस्त
रक्षितः॥तेसर्वेस्वायोमनस्वतीहोमंकुर्युः॥अग्निषूत्यादितेषुषट्कृत्वःप्रायश्चित्तंकरणेसति
अहूयमानेग्निहोत्रेऽस्तमाग्निहोत्रहोमादूर्ध्वंअकृतसमत्वादाधानंकर्तव्यंचेत्तरात्रमहूय
मानोग्निर्लौकिकःसंपद्यतइतिवचनात्॥अस्तमाग्निहोत्रकालात्सर्वमेवान्यथाकृतमित्यत्रा
तेविधानेनाग्निमुत्पाद्यअस्तमाग्निहोत्रेयथोक्तंप्रायश्चित्तंकृत्वाऽकृतानामग्निहोत्रहोमानां
मकृतप्रायश्चित्तत्वाद्धोमविच्छेदप्रायश्चित्तंमनस्वतीहोमंकृत्वाहोमान्कुर्यात्॥गार्हपत्यस्या

यथोत्पादनेऽग्निहोत्रकाले तीनेऽधानं कर्तव्यं ॥ अस्यास्तमयात्सर्वमन्यथाकृतमिति हादं
चेद्विधानेनाग्निं पुनरुत्पाद्यौकप्रायश्चित्तं कुर्यात् ॥ अस्योरमेध्यादिनोपघातेसत्यग्नीन्
भ्रमरहितः पालयेदग्निस्वीकारात् ॥ अरणीस्वीकारात्सर्वे यज्ञमयोनुगच्छेयुः स्वदाधान
मेवप्रायश्चित्तं ॥ अस्य कात्यायनः ॥ अस्योःक्षयनाशेषग्नीन्समाहितः पालयेदुपशांतेष्व
धानमिति यस्याग्निहोत्रीलोहितंदुग्धानदायजमानाद्गृहान्निष्क्रमनेतिसंप्रेष्यतिविहाराद्गृहिनि
गच्छतेतिःतदादक्षिणाग्निंकठादिभिःपरिस्तीर्यदक्षिणाग्नौश्रपयित्वातस्मिन्व्याहृतिभिःत्र
लीवासर्वंजुहुयात् ॥ ततोग्निहोत्रीगामन्यस्मैब्राह्मणायदद्यात् ॥ यावज्जीवंतस्यसमीपेन
गच्छेत् ॥ तस्यान्यांदुग्ध्वाग्निहोत्रंजुहुयात् ॥ अग्निहोत्रीवत्सोपस्पर्शायदिशब्दंकरोतितदा
लौकिकेनाज्येनाहवनीयेनुहोतियस्माद्दोषानिधीदसि वासिष्ठनिवा ॥ अपनपस्पर्शाति
अथवानयर्चाधेनुमेवाग्निमंचयेत्नहोमः ॥ अनग्नौकालेचतुर्थमुत्तीयमानंयदिस्कंदे
त् ॥ स्तोत्याम्रुपदोहरोघमानीयस्कन्नमग्निमंत्र्यपुनश्चतुर्थमाधेनीयाग्निहोत्रंजुहुया
२० त् ॥ यस्यस्वमितेऽस्वमितेवाग्निहोत्रंजुहोति अकालेकृतस्याकृतसमत्वान्नास्मिन्ने २०

वाहवनीयेपुनःपरिषेकादिसांगोहोमःकर्तव्यः ॥ प्रणयनस्यकालेकृतत्वान्नपुनःप्रणयनं
होमानंतरंयजमानोभवतंत्रःसमनसावित्याहवनीयगार्हपत्याउपनिष्ठतेयदिप्रातरुद
यात्सर्वमुदितहोत्रेत्यग्निहोत्रहोमंजुहुयादुदितेपुनःपर्ववदग्निहोत्रंकृत्वायजमानोभवत
न्त्रःसमनसाविति पुनिष्ठतेग्निहोत्रस्यपर्वाकृतेकृतायांयदियजमानोम्रियेताहवनी
यस्यदक्षिणार्द्धेशीतेभस्मन्यन्तराकृतिहोमः ॥ अग्नयेकव्यवाहनायस्वधानमइतिसर्वं नि
नयेत् ॥ यस्याग्नीनांभस्मरोहिणिहितस्तत्रैवान्तराकृतिहोमः ॥ प्रदानादिवर्जमग्निहोत्रेस
माप्यपित्रमेधः ॥ अग्निहोत्रेप्रक्रांतेपर्वाकृतेःपर्वेयदियजमानोम्रियेतनदापर्वाकृतिप्रभृ
तिमंताग्निहोत्रविधानेनाग्निहोत्रंसमाप्यपित्रमेधंकुर्यात् ॥ यस्याहिताग्निर्दुस्वप्नंपश्येत्त
दाज्यंसंस्कृत्यायंतइंद्रभयामहइति ॥ त्वंहीतिद्वेस्रुवाकृतीर्जुहुयात् ॥ आहिताग्निर्दुस्वप्नंप
श्यन्नकृतावार्त्विज्यंकृत्वाकृतुंसमाप्यजनंतरंस्वाहवनीयेआग्निगार्हपत्यिरित्याकृतिंजुहुयात्
जपेदाग्नेयाज्याहिताग्निरन्यस्यकृतवार्त्विज्यंकृत्वास्वाहवनीयेआग्निगार्हपत्यिरित्याकृ
तिंकृत्वान्वयंहसोमपानमित्रंजापोपुष्यमासीनदादिअनंतरिताःपितरइत्यंतंकुर्या

त्॥अग्निहोत्रिरसोमयाजी॥परसोमेनयजतितस्यनैमित्तिकंपरिभक्षकर्मसोमयाजिनोपि
सोमयाजयितुर्नैमित्तिकमितिश्रौत्यः॥यद्वैसमाप्यपरिभक्षकर्मप्रायश्चित्तंकरिष्यइतिसं
कल्यस्वकीयाग्नीन्विहृत्याज्यंसंस्कृत्यायंपुष्पमित्यादिभिर्मंत्रैराहवनीयेजुहोतिकृत्वाज्य
स्यशेषमन्यत्रनिनीर्यवयंसोमेतितंशेषंभक्षयतिअथदक्षिणाग्नौदेवेभ्यःपितृभ्यःस्वाहे
तित्रिभिर्मंत्रैःप्राचीनावीतीजुहोति॥दक्षिणाग्नेःपश्चाद्दक्षिणाग्नेषुदर्भेषुदक्षिणांदद्दा
सीदेवाहमाद्यध्वमितित्रिभिर्मंत्रैर्दक्षिणाप्राग्ग्रेषुदर्भेषुनिनयति॥अनंतरिताःपित
रइतिपितृणामेवोपस्थानंयेषांदधिदत्तं॥अग्निविहरणादूर्ध्वंअग्निहोत्रहोमात्पूर्वं
यदियजमानोग्नियाद्भक्षयेत्तदास्मिन्नेवाग्नौपत्नेवयंपुरुषत्रायन्निष्टायथाहव्यवद्दस्व
इत्येताभ्यांहविष्कृतीर्जुहुयात्॥समिधावाददधाद्वा॥कूचीवाजपेतत्रसमिधानाद्
ध्वंसायमहुतेग्निहोत्रेनाभीयादितिकात्यायनवचनात्॥अनाहिताग्नेर्व्रतिलोपान्नव्रात
पीतीष्टिःकर्तव्या॥यस्यसप्तस्यसतःसूर्योविनिम्लोचतिसोविनिमिम्लुकः यस्यसप्तस्य
२१ सतःसूर्योभ्युदेतिसोभ्युदितः॥एतयोरपिमनस्तीहोमःप्रायश्चित्तं॥यजमानेग्रामांत २१

रगतेपुत्रांतेवासीपत्नीवायग्नीन्यद्यग्राद्बहिर्नयेयुःस्तदाग्नयोलौकिकाभवंति॥यजमा
नेऽग्निसंमीपस्थेपत्न्याअपिग्रामांतरगमनमाचार्येणोक्तं॥पत्न्यामपिप्रोषितायायजमा
नेनपुत्रादिभिर्वाग्नीनाद्बहिर्नयनेलौकिकत्वंस्यात्॥प्रोषितेयजमानेपत्न्यपिग्रामवास्क
सीम्नोबहिर्गत्वाहोमकालात्पूर्वमनागतायेन्नदाग्नयोलौकिकत्वंस्यात्॥पत्नीबहुत्वे-
पिस्वामित्वाविशेषेणान्यतरस्यांग्रामांतरंगतायामग्नयोलौकिकत्वंबहिर्नयनेभव
ति॥यजमानासन्निधौएकस्यामपिग्रामवास्कसीम्नोबहिर्गतायांहोमकालात्पूर्वमना
गतायामग्नयोलौकिकत्वंस्यात्॥अथयदियजमानश्चपत्नीचोभावेवग्रामांतेवावसी सीमांते
दतिअग्निहोत्रहोमश्चलुप्यते॥विकृतमन्याधेयंकुर्यात्॥अस्यायमर्थः॥यजमानः पत्नी
चाग्निसकाशात्बहिर्गत्वाग्रामवास्कसीम्नोबहिर्वसेतांतदाग्नयोलौकिकाःस्युः॥एते
षुनिमित्तेष्वन्याधेयमेवप्रायश्चित्तं॥यदोभावपिग्रामवास्कसीम्नोबहिर्गत्वाहोमकाला
त्पूर्वमागतौचेन्नाधानमितिकेचित्॥यजमानःपत्नीचोग्रामाद्बहिर्यद्विहोमकालेव
सेतांतदान्याधानंकर्तव्यं॥इतरेगपरिशिष्टे॥विहायाग्नीन्स्नायंश्चेत्सीमामुल्लंघ्य

गच्छति॥होमाकालात्ययात्तस्यपुनराधानमिष्यते॥एवपक्षःशिष्टैरनुष्ठीयतेंगीकृतश्च॥तथा
चाजस्रपक्षेकेवलंपत्न्याःसीम्नोबहिर्गमनेउदयास्तमयेपुनराधानंतथाचभरद्वाजः॥य
दिपत्नीसीमांतेअहित्वाभिनिम्लोचेदग्न्यंदियाद्वापुनराधेयंतस्यप्रायश्चित्तमिति॥इदम
पिसूत्रंप्रोषितेयजमानेपत्नीसीमातिक्रमणविषयमितिकेचित्॥नतोवेवनिष्क्रामतइत्या
चार्यवचनेविहायाग्नीनितिछंदोगपरिशिष्टवचनेनचैकार्यत्वाद्भारद्वाजवचनमुदाह
त्ययजमानपत्न्योःसहप्रवासेप्रकल्पोक्तः॥यावत्योग्रामसर्यादानद्यश्चसीमाअतिक्रांतो
नदीश्चसंतरतौअग्नीनरणीन्वाअन्वारभेयातां॥यदिनान्वारभेयातांतदाजस्राःसमा
रूढावाग्नयोलौकिकाभवंति॥अत्राक्वचिद्विषयेऽन्यतरान्वारंभःकर्तव्यःअन्यतरान्वारंभा
भावेआधानमेवप्रायश्चित्तं॥नदीलक्षणंकेचिदेवंवर्णयंति॥कूलद्वयांतरालंपत्नदीरान्हृन
व नोच्यतेकिंतुतद्देशीयैर्यत्रजलसंघानदीभवेत्॥अष्टौधनुःसहस्राणिनमस्यवनियज्ञालं
नदीत्वाद्यभिधयत्वंनतस्येत्वंनिस्तरत्यः॥एकेनाभिधयेनदेशायोजनगामियत्॥उदकं
तृणदीरान्हृवाच्यमित्यपरेजगुरिति॥कस्मादत्रापिविनाग्निमियंदापत्नीनदींसंतरति
२२ मिनी॥अतिक्रामेत्तदाग्नीनांविनाशस्यादितिस्मृतिः॥नदीसंतरणेयामयोःपरस्परंसंक २२

मणेसर्वत्रायंतसीम्नोर्वापत्नीयजमानावग्नीनरणीन्वान्वारभेयातां॥अनन्वारंभेग्नीनां
लौकिकत्वंस्यात्॥तथाचत्रिकांडीनदीसंतरमणेग्नीनांसीमासंक्रमणेतथा॥सर्वत्रायंतसी
म्नोर्वास्यामिस्पृष्टास्थरग्नयः॥प्रत्यक्षचारणीद्वारमत्यग्निर्विवाहनं॥आमरोपणप
क्षेचनान्वारंभणमिष्यते॥प्रोषितेयजमानेऽपिहोत्रर्षिऽपित्यज्ञनित्येष्वयः कर्तव्याःइष्टि
पशुसोमादीनिनकर्तव्यानि॥यजमानकर्तव्यतास्वत्यागमात्रंकर्तव्यतायांयुक्तंदर्वीहोमा
दिकमवसरप्राप्तमध्वर्युणापत्नीसमीपेकर्तव्यंपत्न्यांरजस्वलायांप्रस्तायांपूर्वमेवनिपु
णोध्वर्युःकुर्यात्॥यजमानेप्रोषितेआग्रयणादिनकुर्यात्॥अग्निहोत्रीगोत्रीहिंसेवयव
लंवादीनादधित्वातस्याःपयसाग्निहोत्रंजुहुयादित्यादिपक्षमाश्रयेत्॥नैमित्तिकाजाते
ष्टिगृहदाहेष्वादयोयजमानागमनपर्यंतमारुध्यंतेयास्कप्रायश्चित्तेष्वयस्त्रासुएर्णाकुमिः
कर्तव्या॥आधानादिकंनकुर्यात्॥यजमानकर्तव्यानियानिमंत्रोक्तानिकर्माणितत्स्था
नेमंत्रजपंकुर्यात्॥यजमानोविस्रुक्रमोत्सर्पणोयत्रस्खलितःतत्रकुर्यात्॥अदृष्टार्था
निकर्माणिलुप्यंतेदृष्टार्थानिकुर्यात्॥कृतंमंत्रजपःकार्यः॥अस्मिन्नर्थेत्रिकांडीव

+ यजमानःजपत्युःकर्मकालेकर्माणिकुर्यात्॥विस्रुक्रमोत्सर्पणवर्जेसर्वंकुर्यात्॥+ २

च नानिपित्र्यतोग्निहोत्रंचप्रकृतीष्टिंविनेतरत्॥पश्चिष्टिसोमयागादियजमानक्रियान्वि
ता॰स्वामिनिप्रोषितेनालीयाहकात्यायनोमुनिः॥यजमानक्रियाश्चर्त्विग्दर्वीहोमादिकिंच
न॰नुद्देश्यागमात्रेणयजमानेनसंयुतंःकुर्यादृत्विक्पत्नीसमीपतः॥पत्न्यांर
जस्वलायांवाप्रसूतायामथापिवा॥पूर्वमेवनियुक्तःसन्नृत्विक्कुर्याद्यथोदितं॥अथाग्निहो
त्रंनित्येष्टिःपित्र्यज्ञइतित्रयंकर्तव्यंप्रोषितेपत्नौनान्यत्स्वामिक्रियान्वितं॥प्रवसत्याहिता
ग्नौतुयदाप्रत्ययएमागतं॥अग्निहोत्रंत्रीहिलवंतिपक्षंसमाश्रयेत्॥नैमित्तिकंचजातेष्टि
ग्रहदाहेष्टिपूर्वकं॥प्रायश्चित्तेष्टिसंप्राप्तौकुर्यात्पूर्णांतिबुधः॥अग्न्याधेयादिकंप्राप्तमु
यानुगमादिना॥स्वाम्यागमनपर्यंतमुक्तंचमनौषतः॥यावंतिस्वामिकर्माणिमंत्रोक्ता
नीतराणिचानेषांनिवृत्तिःसर्वेषांतत्रस्याज्ञयैवच॥विलुप्तकोत्सर्गमात्रंकर्तव्यंवच
नाद्भवेत्॥इष्टिप्रयोजनार्थानिस्वामिकर्माणियानितु॥तत्सोमध्वर्युरन्यानिकुर्यान्मंत्रा
न्नपेक्षतिं॥अदृष्टार्थानिलुप्यंतेजपेन्मंत्रांश्चतानपीति॥॥इतिप्रायश्चित्तप्रदीपेऽग्निहो
त्रप्रकरणंसमाप्तं॥॥अथदर्शपूर्णमासप्रायश्चित्तानिवक्ष्यंते॥तत्रप्रथममनालंभुका

BHAU DAJI

विषयप्रायश्चित्ते॥अन्वारंभणीयायांप्रक्रांतायांसंकल्पानंतरमनालंभुकायामपरुध्यपत्नी
विहायप्रयोगंसमापयेदिति॥केचित्तुअग्न्याधानादूर्ध्वमनालंभुकायामपरुध्यसमाप
येदित्याहुः॥दर्शपूर्णमासयोर्विशेषोवक्ष्यते॥अर्द्धंवाएतस्ययज्ञस्यहीयतइत्यादि॥पत्न्या
मनालंभुकायामेतस्ययजमानस्यार्द्धंहीयतेऽभार्यासहकर्तव्यत्वात्॥व्रत्येहन्यनालंभुका
भवतीति॥व्रत्येहस्थितिकर्मलक्ष्यते॥व्रताहैकर्माणिसंकल्पादिनाप्रक्रांतेऽनालंभुकायामप
रुध्ययजेत्॥अपरोधनंनामक्रतुश्यापारोदासीनकरणं॥सर्वैरेवयज्ञैर्नयजतेसांगेनपत्न्या
कर्तव्यमितिस्वयमेवकरोति॥तामिष्वायजेतेतांसुद्धांचतुर्थेहनिकर्मार्थमुक्रामयेतस
म्रहमस्मीति॥क्रतुकालमुपगमनंमंत्रोवा॥अग्न्याधानप्रारभ्यपरुध्यैवयजेतेति॥सं
कल्पादूर्ध्वमनालंभुकायांपत्नीविहायैवअग्न्याधानादिकर्मकुर्यात्॥दर्शपूर्णमासयोः
प्रथमप्रयोगेसंकल्पात्पूर्वमनालंभुकायांविरम्यकालांतरेकुर्यात्॥संकल्पादूर्ध्वंकर्मा
रंभात्पूर्वंअन्वालंभुकायामन्वाधानात्प्राग्यपरुध्यैवसमापयेत्॥द्वितीयादिप्रयोगेषुसं
कल्पात्पूर्वमनालंभुकायांसंकल्पप्रारभ्यपरुध्यैवकुर्यात्॥एवंविकृतीष्टिष्वप्यायणंचा

तुर्मास्येषु पशुष्वपि भवति॥ आन्येत्याहुः॥ प्रथमप्रयोगे संकल्पादूर्ध्वमन्वाधानात्सर्वमनालंभुकायां विरम्य कालांतरे कुर्यात्॥ अन्वाधानादूर्ध्वमनालंभुकायामपरुध्य समापयेत्॥ द्वितीयादिप्रयोगे संकल्पात्सर्वमनालंभुकायां विरम्य कालांतरे कुर्यात्॥ संकल्पादूर्ध्वमनालंभुकायामन्वाधानप्रभृत्यपरुध्य समापयेत्॥ एवं विकृतीष्टिपशुचातुर्मास्येष्वपीति॥ चातुर्मास्यौदाहरणमिदानीं व्याख्यास्यते॥ व्रत्यमहर्नामिव्रतोपयनं तद्विसर्गयोर्मध्यं उच्यते॥ केचिद्व्रताहर्महर्व्रत्यमिति॥ तेषामेतद्दर्शपूर्णमासादीनां कर्मणां कल्पः पर्वादिव्रत्यमहः॥ एषपक्षः प्रायेणानुष्ठीयतेऽद्दष्टैः॥ केचित्संकल्पादारभ्येति वर्णयंति॥ तस्मिन्व्रत्येऽहनि यदि पत्नीरजस्वला स्यात्तदा पत्नीकर्मवर्जं दर्शपूर्णमासादिकर्तव्यं एवं एवं दर्शपूर्णमासतन्निकारेष्टिपशुचातुर्मास्येषु॥ अन्वाधानादूर्ध्वं रजस्वलायामपरुध्येव यागः कर्तव्यः कर्मारंभात्सर्वं चेत्कालांतरे यागः कर्तव्यः॥ पत्न्यामनालंभुकायां बद्धजलीकस्यान्यतमस्यामनालंभुकायां कर्माणि कारयेत्॥ अन्यस्यामविद्यमानायामनालंभुकायां कर्मतत्पुत्रो ब्रह्मचारी गृहस्थो वा कुर्यात्॥ तन्नैवान्यजमानः स्वायतने आसीनो जपेत्॥ प्रेषे पत्नीसंयाजेति पदद्वयलोपः

प्रेषिते यजमाने तन्मंत्रान्पुत्रो जपेत्॥ संभरणकाले योक्त्रं वेदेः पश्चादुद्गग्रं स्थणीयात्पत्न्यवेक्षणाभावे तेजोसीत्यज्याधिश्रयणं नास्ति॥ योक्त्रविमोचनकाले मंत्रेण योक्त्रमाददीनान्यत्सर्वं पुत्रः कुर्यात्॥ पत्न्यां प्रसूतायां स्त्रीप्रसवेमासपर्यंतं पुत्रप्रसवे विंशतिरात्रं कर्मानर्हतयानकर्मपुत्रः कुर्यात्॥ रोगादिना कर्मण्यसमर्थायामप्येवमेव कुर्यात्॥ ॥ तथा च काण्वायनः॥ प्रक्रांतमग्निहोत्रादिकर्म यच्छ्रुतिचोदितं॥ आर्तवत्यिपुतां पत्नीं विहाय कुरुतेद्विजः॥ इष्ट्यामारभ्यणीयायां प्रकृतेर्वैकृतीष्वपि॥ कृतादूर्ध्वं स्तुदस्त्रं कुर्यात्कार्यं नलोपयेन्नृतिः॥ अन्वाहितेषु अग्निषु यदि त्रयो नुगच्छेयुर्गार्हपत्यात्सायतनेभ्यः कर्मणोभस्मनारणीसंस्पृश्येतः प्रथममित्यादिनामथित्वागार्हपत्यायतने निधायदक्षिणाग्निमाहवनीयं चप्रणीयान्यंसलयहोत्रादीनामन्यतमेन प्रायश्चित्तं कृत्वा पुनरन्वाधाय चाहुतिभिरुपतिष्ठेतयद्दासमारोपणकर्मणेत्यथकूश्मथित्वायतनेषु निधायतत्रतत्रोक्तप्रायश्चित्ताहुतीर्हुत्वापुनरन्वाधाय चाहुतिभिरुपतिष्ठते॥ यद्वान्वाहितोगार्हपत्यन्द्यौरित्येतेन मंत्रेणारणीभस्मनासंस्पृश्येतः प्रथममित्यादिनामथित्वादक्षिणाग्निमाहवनीयं चानुद्धायैवगार्हपत्यायतनेनिधायज्यं

संस्कृत्य होत्रादिनामन्यतमेन प्रायश्चित्तं कृत्वा॥ गार्हपत्यं पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत।
अन्वाहितोदक्षिणाग्निरुद्धृतश्चेद्गार्हपत्यान्नं प्रणीय दक्षिणाग्नौ चतुर्होतारं गार्हपत्येदृशात्मकं
कृत्वा दक्षिणाग्निं पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत॥ दक्षिणाग्नेर्भिन्नयोनित्वे या प्रकृति
स्तत आहृत्य निधायतत्र चतुर्होतारं कृत्वा दक्षिणाग्निं पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत॥
अन्वाहितआहवनीयउद्धृतश्चेत्तेनैव समसमारोपणाघृतामथित्वाहवनीयायतनेनिधाय
पंचहोतारं कृत्वा पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत॥ यद्वा गार्हपत्यादाहवनीयं प्रणीयेतः
प्रथममित्यादिमंत्रत्रयं जप्त्वाहवनीये पंचहोतारं गार्हपत्येदृशात्मकं कृत्वाहवनीयं पुनर
न्वाधाय व्याहृतिभिरुपतिष्ठेत। द्वयोः सहानुगमनेपि तत्र पूर्वोक्तं प्रायश्चित्तं कृत्वा पुनरन्वा
धाय व्याहृतिभिरुपतिष्ठेत॥ सभ्यावसथ्ययोर्नाशेआहवनीयात्प्रणीयानयोः सर्वाभावे तू
न्कृत्वात्मीमन्वाधाय व्याहृतिरुपतिष्ठेत। भिन्नयोनित्वपक्षेयाप्रकृतिस्तत आहृत्य पू
र्वोक्तं प्रायश्चित्तं कुर्यात्॥ अजस्रपक्षेन्वाहिताग्न्योग्नयोयद्यनुगच्छेयुर्गार्हपत्यायतने
पूर्वोक्तप्रायश्चित्तेभ्योमंत्रेणाग्नेस्तनूरसीत्यरणीकर्मणासंस्पृश्येतः प्रथममित्यादिनाप्यथकुर्म

थित्वायतनेषु निधायाज्यंसंस्कृत्यगार्हपत्येसर्वान्होतॄन्दक्षिणाग्नौ चतुर्होतारंआहवनीये
पंचहोतारं कृत्वासर्वान्पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत। अन्वाहितोगार्हपत्यउद्धृत
श्चेदुल्मसमारोपणाघृतामथित्वागार्हपत्यायतनेनिधायहोत्रादीनामन्यतमेनप्राय
श्चित्तं कृत्वापुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत॥ अन्वाहितेगार्हपत्यउद्धृतेसतिअजस्रं
बुध्याहवनीयाग्निं नाहरेत॥ अन्वाहितोदक्षिणाग्निरुद्धृतश्चेदुल्मसमारोपणाघृतामथि
त्वादक्षिणाग्न्यायतनेनिधाय चतुर्होतारं कृत्वापुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत॥ य
द्वादक्षिणाग्नेर्नाशोगार्हपत्यान्नं प्रणीयदक्षिणेचतुर्होतारं गार्हपत्येदृशात्मकं कृत्वापुन
रन्वाधाय व्याहृतिभिरुपतिष्ठेत॥ अन्वाहितेआहवनीयेनुगतेभस्मसमारोपणाघृता
मथित्वाहवनीयेनिधाय पंचहोतारं कृत्वापुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत। यद्वाहवनी
यनाशेगार्हपत्यान्नं प्रणीयाहवनीयेपंचहोतारं गार्हपत्येदृशात्मकं कृत्वापुनःपुनर्द्वयोर्द्वयोः
सहानुगमनेतत्रतत्रपूर्वोक्तं प्रायश्चित्तं कृत्वापुनःपुनरन्वाहिताग्नेर्यथोपपत्तौसंभवे
ष्टनसियज्ञपात्रादिसाधनानिनिधाय दक्षिणामनुद्धार्यंपुंस्काज्यंसंस्कृत्यतावन्मात्रेपयो

प्रा॰ णिपर्णमयांस्रुचिचतुर्गृहीतंगृहीत्वाहवनीयेजुहोतिअन्वारब्धेयजमानेतुभ्यंताजेगिरस्तमे प्र॰
तिस्रुचमाहवनीयेप्रक्षिप्यसद्यमनड्वाहंयुक्तंजस्रैःसमारोप्यवाप्रयायात्॥अन्वाहिता
ग्नेःप्रयाणेदीक्षितस्यप्रयाणेउद्धरणेपक्षेपित्रयाणेसमारोपणं॥अजस्रपक्षेसर्वदात्रया
णेसमारोपणं॥अग्नीँश्चकठेनिधायारणीचाभिलक्षितदेशंगत्वापथकृन्मथित्वाविहारं
नि॰ कल्पयित्वातत्रतत्राग्नीँधायमनस्तीकृत्वाप्रयोगशोषंसमापयेत्॥दक्षिणाग्नेर्भिन्नयोनि
त्वपक्षेपथगरणीभ्यांसमारोप्यमंथेत्॥सान्नाय्यस्यान्वाधानदिवसेविधानात्तद्विषयेप्राय
श्चित्तंमुच्यते॥॥सान्नायार्थंषडुक्षावःपयोपाकृतावत्सदोहनात्कूयदिधयेयुस्तासांग
वांयत्किंचित्पयोपिनलभ्येरन्॥तदानीमेववायुदेवत्यायवाग्वासायंयजेत्॥इत्यापक्ष्य
इतिसंकल्पः॥॥अन्वाहितत्वान्नान्वाधानं॥इध्माबर्हिःसंनह्यवायवेजुष्टंनिर्वपामीतितेतु
ल्यान्निरूप्यौषधधर्मेणाहवनीतंकृत्वाचरुस्थालीमधिश्रित्यतंतुल्यैर्यवागूपक्त्वावि
श्रा॰ घ्यान्निघार्यासाद्यध्मानंप्रोक्ष्याज्यभागांतंकृत्वावायवेजुष्टंहिवायुंयजेतिसंप्रे
२६ ष्यवाग्वावायुंयजेत्॥वायोशतंप्रयाभिर्यासि॥इतियाज्यानुवाक्ये॥वायोरहंस्रुमा २६

ग्रहासोत्थिएरुद्रादिसमानंव्रतारंभव्रतविसर्गौयजमानस्यानविपेतेपुनरालंभवर्जंसंनि
धतेतदानीमेववापयोदुग्ध्वासायंदोहंसंपाद्यमिंद्राकृतीकृत्वासर्वासांवत्सानपाकृत्यापो
ष्यश्वोभूतेप्रातर्दोहायसर्वासांपयोदोहयित्वाइडांसमापयेत्॥यदिसर्वासांपयोसिक्तेर्धा
त्रियेनकेनचिदुपायेनेषदपिपयोदोहयित्वातस्मिन्पयोनिनीयसुरक्षितंनिधायोपवसेत्॥
श्वोभूतेआग्नेयमैंद्रंचसंनिरूप्यवायवेयवाग्वर्थंतंतुल्यान्निर्वपेत्॥तंतुल्यप्रक्लृप्तंनंकृत्वा
वायवेविसृज्याग्नेयमैंद्रंचसंनिरूप्यप्रातर्दोहंकृत्वाग्नेयंपवमानंदिसायंदोहंकृत्वाभूतरात्रौस्थापितप
यस्यानीयजलंनिषिच्यदोहधर्मेणकुंभीमधिश्रित्यांतरेणशारंपवित्रमंतर्धायतंतुला
न्प्रक्षिप्ययवागूंपचेत्॥सान्नाय्यप्रोक्षणंनिधित्वान्नात्रौषधर्मः॥॥यवाग्वंविसृज्याग्निघार्यां ७
लंकृत्यहविर्भिःसहवेद्यामासाद्याग्नेयोपांशुयाजाभ्यामिंद्रायानुब्रूहीत्युक्तोद
धिस्थानेयवाग्वमवदायेंद्रंमहेंद्रंवायजेतिअथवापुरोडाशाभ्यामिंद्रंमहेंद्रंवाय
जेतिअथवापुरोडाशाभ्यामिंद्रंमहेंद्रंवेष्ट्वाएथकूयवाग्वावायुंयजेत्॥वायवेनुब्रू
हिवायुंयजेति॥वायोशतं॥प्रयाभिर्यासि॥इतियाज्यानुवाक्ये॥वायोरहमिंद्रयावीजेमा

मिनिवा॥ वायोः पथ्याऽपक्षेऽआवाहनकालेऽइंद्रावाहनानंतरं वपुमावाहयेत्॥ निगदेनुतथैव
निर्दिशेत्॥ एवमिष्टिंसमाप्यतदानीमेवाधानाद्यपक्वेन्यसायंदोहंदोहयित्वोपोष्यद्भासहामा
वास्येनयजेत यद्वाबह्वीनांगवांमध्येयद्येकाप्यधानीतांदोहयेत्॥ धानागानदुह्यात्॥ अथाजाया
गोःपयसासायंदोहमुत्पाद्यमिंदाकृतीकृत्वादुग्धानांवत्सानपाकृत्वोपोष्यश्वः प्रातर्दोहंकृत्वा
प्रावास्येनयजेत॥ प्रातर्दोहपयसः पानपेकामयेतांदुग्ध्वाप्रातर्दोहंकृत्वामिंदाकृतीकृत्वाया
गंसमापयेत्॥ सायंदोहविनाशेनुरात्रौतदानीमेवपाणीसंमृश्यपरिस्तीर्याग्नेणगार्हपत्येत्
एनिसंस्तीर्यतेष्वग्निहोत्रहवणीस्रुवंसंमृदुपात्रीचसादयित्वाब्रह्मणंदक्षिणेतःपरिस्तरपरि
स्तरंकृत्वाग्निहोत्रहवणीं॥ स्रुवंचादायसायंदोहनप्रतिनिधिपुरोडाशार्थमिंद्रायमहेंद्रायवा
व्रीहीन्निरूप्योपवसेत्॥ श्वोभूतेकृतान्यदार्थानपहायपात्रासादनानिकृत्वारात्रौनिरुप्त
व्रीहिष्वाग्नेयमैंद्रंमहेंद्रंवानिरूप्यप्रातर्दोहंदोहयित्वाग्नेयोपांशुयाजायामिष्वाइंद्राया
नुब्रूहीतिपुरोडाशमवदायश्रपंचावदायद्भःस्थानेकृतंद्वितीयपुरोडाशमवदायैंद्रंमहे
द्रंवाइत्याइंद्रियंसमाप्यतदानीमेवान्वाधानाद्यपक्वेन्यसायंदोहंदोहयित्वाऽपोष्यश्वोभूते
तेदध्नासहामावास्येनाद्यापन्नेनयजेत॥ अथवासायंदोहनाशेप्रातर्दोहंद्वेधाकृत्वाएकंभाग

मातंद्यसायंदोहस्थानेकुर्यात्॥ अपरंभागंश्रपंतस्थानेकुर्यात्॥ मिंदाकृतीकृत्वाद्याहनिभिश्चकृ
त्वायागंकुर्यात्॥ प्रातर्दोहनाशेपितस्यस्थानेऐंद्रंपुरोडाशंनिरूप्यउपांशुयागंतंकृत्वाइंद्राय
महेंद्रायचानुब्रूहीत्युक्त्वाश्रपंतंपुरोडाशमवदायश्रपंतस्थानेकृतंद्वितीयंपुरोडाशमवदायद
ध्नासहप्रचर्यतदानीमेवान्वाधानाद्यपक्वेन्यदोहंसंपाद्यश्वोभूतेश्रपंतंसंपाद्ययागंकुर्यात्॥
सायंप्रातर्दोहद्वयनाशेऐंद्रंमाहेंद्रंवापंचशरावमोदनंनिर्वपेत्॥ अग्निहोत्रहवण्यांनिर्वपः
शरावेणवाग्निहोत्रहवण्यांनिर्वापपक्षेचतुरोमुष्टीन्निरूप्यद्वौष्टावापकालेशरावपर्या
प्तव्रीहीनावपेत्॥ पंचशरावमितिपंचपुरुषभोजनपर्याप्तमोदनंपंचशरावंओदनस्यकर्मा
नरत्वेपिओषधधर्माविघातेऽग्नेयविकारत्वात्॥ यदादोहयोःप्रतिनिधिस्तदानेषधर्मः
मरुत्वांस्तोत्र्याऽमोदनंपक्वाप्राकृतेहविर्भिःसहपर्यग्निकरणं॥ अग्निधार्योहात्यहविर्भिःसह
वेघामासाद्याग्नेयोपांशुयाज्यामिष्वापुरोडाशमवदायदोहद्वयप्रतिनिधिंतादोहनंचतु
रवत्तमवदायैंद्रंमहेंद्रंवायजेत॥ एवमिष्टिंसमाप्यतदानीमेवान्वाधायसायंदोहंदोहयि
त्वोपोष्यश्वोभूतेश्रपंतदधिश्रीसहआमावास्येनयजेत॥ यद्वासर्वदोहनाशेऽपहारेवामिंदा

कृतीः प्रायश्चित्तं चाहुतिभिश्चकृत्वादोहयोः प्रतिनिधित्वेनघृताज्याद्वदायेष्टिंसमाप्यतद्वा प्र०
नीमेवान्वाधायदोहयित्वोपोष्यश्वोभूतेदधिभ्यांसहयजेत॥सान्नाय्येश्रथमाएत्तापाडुह
त्याग्नेरन्यत्रयदिविषंदेत्॥तदक्रूरेत्यवल्मीकवपायांप्रजापतेनत्वदेतानितिनत्वयाऽप्य
भ्रर्भुवसुवरित्यपतिष्ठेत॥अन्यांदुग्ध्वापुनःसन्नयेत्॥सान्नाय्यंयदिकीटावपन्नंस्यात्॥त
न्मध्यमेनोत्पमेनवापलाशपर्णेनमहीयोःपृथिवीचनइत्यन्तःपरिधिदेशेनिनीयान्यां
दुग्ध्वापुनर्यजेत॥सान्नाय्यमभिमृष्टंचेन्निर्नेजनानीतिमंत्रेणाहवनीयेहुत्वान्यांदुग्ध्वापु
नःसंनयेत्॥यागकालेकीटाद्यपहतमध्याद्यपहतंचसान्नाय्येजुहूप्रक्षिप्यलोकिकं
दध्यानीयस्तंचदोहमंत्रानुजप्त्वाभिघारयुक्तीर्व्याहृतिभिश्चहुत्वातेनैवप्रचरेत्॥सान्नाय्ये
पूतिगंधेनदुष्टेतदक्षप्रक्षिप्यपुनःसंनयेत्॥सान्नाय्यस्यपुरोनुवाक्यायाजास्यंदेनेयजमानः
संत्वासिंचामीतिस्रुक्प्रस्तरस्योपरिजलंसिक्त्वाभिमंत्रयेत॥अध्वर्युरुपनयेत्स्वाहेत्यादिनास्रुं
दमनुमंत्र्यदुर्गादिगणंहुत्वास्रुक्प्रणीतेषुप्रचरेत्॥सर्वस्रुक्लौकिकंदधिपयोवाऽऽनीय
२८ दोहमंत्रानुजप्त्वादुर्गादिगणंहुत्वातेनप्रचरेत्॥आमावास्यायांआग्निहोत्रंहुत्वासान्नाय्यं २८

स्यआज्यसंचनार्थेअग्निहोत्रेहविषांसिदध्यात्॥तन्नमादायदर्शेनयेत्पुनरग्निहोत्रंहुत्वा
ग्निहोत्रेहविषासान्नाय्यमातंत्र्यात्॥दर्शपूर्णमासादिषुमंत्रेणोपरिनिहितंस्रुवावघ्रि
ध्यादिषुयथोनिपतेत्॥ब्रह्मप्रतिष्ठामनसाऽनुमंत्र्येतयापुनःस्रुक्स्थानेतत्प्रतिष्ठापयेत्तेनैवस्रु
वाहुतिंजुहुयात्॥हुत्वावाप्रतिष्ठापयेत्॥हुत्वानंतरंकर्मकुर्यात्॥अव्यवहितमेवकुर्यात्
एवमन्येष्वपिनैमित्तिकेषुसर्वत्रयथापन्नमतिक्रांतंकर्मपुरस्तादुपरिष्टाद्वाप्रायश्चित्तानं
तरंकर्तव्यं॥यथाश्रुतादिषुकृतेषुप्रायश्चित्तंकृत्वापुनःकर्तव्यानीतिसामान्यमतेत्॥
अथापवादः॥अतिक्रांतंकर्मनाद्रियेतप्रमादात्प्रायश्चित्तात्पूर्वंमेनामकृत्वाऽनंतरमेव
मेकृतेपुनःपूर्वमंगंनकर्तव्यंयद्यर्थलुप्तंभवतियदिप्रयोजनंस्यंभवतितत्प्रायश्चित्तं
मे-वेति॥यथाश्रुतावघातेदनमकृत्वाछिन्नशाखयावत्सापाकरणेकृतेपुनःशाखाछेदनं
नकर्तव्यंप्रयोजनाभावात्॥एवंखलनस्यखलवनंखातस्यखननं॥अवहत्यावहननंपिष्ट
स्यपेषणंदग्धस्यदहनमित्यादिवचनादतेनकर्तव्यं॥क्वचिदर्थलोपाभावेपिवचनाभक्रि
यते॥यथात्वरमाणइवोपसद्भिःप्रचरेयुर्नीकृतमादियेरन्निति॥क्वचिदर्थलु
प्तेपिमंत्रोच्चारणमिष्यंते॥छिन्नेलूनेतथापिष्टेसान्नाय्यमातिकेतथा॥पश्चान्मंत्राःप्रयो

कथामंत्रायज्ञार्थसाधकाइतिवचनात्॥तथाचकात्यायनःस्वातंत्र्यंनास्तिभावहविष्टुग्धद
ग्धेषुयजुःक्रियासंभवादितिसर्वत्राश्रावितमंत्राश्रावितवषट्कारणमवचनेऽन्यथावृ
चनेमंत्रादिहीनेतिरिक्तेऽन्यथावषट्कृतेचाश्रावितमित्यचारुकवाकुतिंजुहुयात्॥सर्व
त्रप्रोक्षणादिषूच्चारयितव्यादेवतांविहायदेवतांतरोद्देश्यंद्रव्यंदेवाज्यतिपातयानिइति
स्रुकवाकुतिंजुहुयात्॥निर्वापकालेभागिन्यैदेवतायैयदिनिर्वपेत्॥आभागिन्यैनिरुप्तमिति
यदास्मरेत्तंदेवंहविर्विभज्यानुमौत्वेत्यभिमृश्यतंदेवंसर्वंजुहुयादमुष्मैस्वाहेतिवेषामासा
दनपर्यंतंयदाकदाचास्मरेत्तंदेवमेवंकुर्यात्॥वेषामासाद्यदिस्मरेत्तदानिर्वापक्रमेणभा
गिन्यायागोन्वायान्यस्यस्थानेभवेत्॥तदाहोतापिआभागिन्याआवाहनंनिर्वापक्रमेणकुर्या
त्॥तत्रापियद्देवाइतिस्रुवाकुतिंजुहुयात्॥होताआवाहनकालेभागिनीदेवतामपहाया
भागिनींयत्रावाहयेत्तत्रयद्देवाइतिस्रुवाकुतिंहुत्वाआवाहनक्रमेणभागिनीदेवतांऋचा
ज्याचचुर्गृहीतेनानुद्रुहियजेतियजेत्॥होतापितद्देवत्ययाज्यानुवाक्याभ्यांयजेत्॥ततम
प्रयाजादिनिगदेद्यावाहनक्रमेणभागिनींचनिर्दिशेत्॥भागिनीदेवतांयदास्मरेत्तदोत्था

यमनसावाहयेत्॥सर्वत्रप्रणीताप्रोक्षण्यादिविधूपान्तजलानोक्रियमाणानांसादितानां
चबिंदुपातेचमसादिस्रावेवायोर्हिष्ठेतिकुचमुल्कोनेपात्रंपूरयित्वातंमआपइतिस्रु
वाकुतिंजुहुयात्॥दर्शपूर्णमासेषुप्रारब्धेषुसमाप्तेषुमध्यादिनात्सूर्योनाविर्भवतिचेदुद्व
यमुदुत्यंचित्रमितित्रिभिःस्रुवाकुतीर्जुहुयात्॥यानिकर्माणिसूर्यदर्शनेविहितानिकर्तव्यानि
त्येवार्थःअथवानुदितेसूर्येयानिकर्माणिविहितानिवर्जयित्वा॥अथवायत्रप्रायश्चित्तोक्ति
रस्तियस्याश्चित्तेराख्यमानेसूर्योनाविर्भवतिसोयंबकुरूपमालभेतेत्यादौनैतत्प्रायश्चि
त्तेभवति।सर्वहविर्यज्ञेषुतेसूर्याचंद्रमसोर्ग्रहणेनद्वयमित्यादिनिस्भिःस्रुवाकुती
र्जुहुयात्सर्वत्रविहितेयज्ञकर्मणियजमानस्यर्त्विजांवास्वप्नेरेतोविसर्गेइमंमेवरुणेत्यृ
यामीतिद्वेस्रुवाकुतीकृत्वागंधपुष्पोपहारादिभिःसूर्यमभ्यर्च्यपुनर्मामित्विंद्रियमितित्र
यंजपेत्॥तत्रचेनस्रुवातीर्जुहुयाद्धासमिधोवायादध्यात्॥बुद्धिपूर्वरेतोविसर्गेतुप्रा
तपतीष्टिंकुर्यात्॥यष्टुःस्वदारगमनेवातपतीष्टिःप्रायश्चित्तं।इत्याधेयेष्टयइतिसंकल्पः॥
अग्नयेव्रतपतयेयष्टाकपालंनिर्वपेत्॥त्वमग्नेव्रतपाअसियद्वोवयंप्रमिनामव्रतानीतिया

ज्यानुवाक्ये॥अग्नेर्व्रतपतेरहमन्नादः।आहिताग्नेर्योक्तांतरसंसर्गेव्रतभृद्दृष्टिःप्रायश्चित्तंभ
गारेष्टिश्च।इष्ट्वायक्ष्यन्निसंकल्पः॥अग्नयेव्रतभृतेऽष्टाकपालंपुरोडाशंनिर्वपेत्॥त्वम
ग्नेव्रतभृच्छुचिर्व्रतानिबिभ्रद्व्रतपाइतियाज्यानुवाक्ये॥अग्नेर्व्रतभृतोऽहमन्नादः॥सर्वत्रप्रा
यश्चित्तेष्टीनांपुनरालंभजपोनास्ति।स्रुगारेष्टिस्तुपुरस्ताद्दृश्यते॥तत्सर्गादिषुप्रायश्चित्तम
पिकर्तव्यं॥सर्वत्रहविर्देवतायाज्यानुवाक्याकृतीनांकृताकृतभ्रेषेषंतरितेविपर्यासेचत्वनो
अग्नेसत्वनोअग्नइत्येताभ्यांस्कवाकृतीर्हुत्वायात्॥अन्यस्मिन्नस्यविस्मारःकृतस्यभ्रेषोनाशो
वत्तस्यनाशःतत्रत्वनःसत्वनइत्याकृतीर्हुत्वापुनःस्वस्थानादवदायेत्॥एवमवदानाद्य दाय
करणेयागात्प्रभृत्तेसतित्वनःसत्वनइत्याकृतीर्हुत्वापुनर्विस्मृतावदानमवदायेत॥
एकावदानादिनायागेकृतत्वनःसत्वनइत्याकृतीपुनर्यागः॥विषमंतरायःएकावदा
नाद्यकरणंबहुहविष्केकर्मणिएकस्यहविषोकरणंवाहविषोविपर्यासःन्यत्यासः॥दे
वतायाज्यानुवाक्यानांएकस्यवाविस्मरणमंतरायःविपर्यासस्त्यत्यासः॥आकृति
भ्रेषःआकृतेर्नाशःयथाअविज्ञातदेवताकृतिर्नश्यति।अयमाकृतेरकृतभ्रेषःआकृते

रकृतभ्रेषस्कयावत्ययोगस्तावदाकृतेरकरणंतत्रसर्वत्रत्वंनोअग्नेसत्वनोअग्नेरतिहे
स्तुवाकृतीस्तुकुर्यात्॥हविर्देवताधर्मणांयाज्यानुवाक्यानांपार्वणांगहोमानांचत्य
त्यासेहस्क॥॥याज्यानुवाक्ययोःपरस्परत्यत्यासेतथानदेवत्याच्ययायाज्ययायागेपित्वनः
सत्वनइत्याकृतीरेवंनपुनर्यागःअंतरितामर्चंजपेत्॥भिन्नदेवत्ययायाज्ययायागेकृते
त्वनःसत्वनइत्याकृतीर्हुत्वापुनर्यागंकुर्यात्॥सर्वत्रहविषिस्खलितभागेनस्खलनादवदाय
पुनर्यागःकार्यः॥हविष्यविद्यमानेहविरंतरंनिरूप्ययागःकार्यः॥प्रक्रांतयागेनसमाप्य
पुनर्यागोवा॥सर्वत्रअवदानेऽकृतेहविषिदोषदर्शनेऽवनंहविरप्सुक्षीतभस्मनिवाप्र
क्षिप्यत्वनःसत्वनइत्याकृतीर्हुत्वापुनरायतनादवदायेत्॥अवदानानंतरंपुरोडाशा
दौदोषदर्शनेऽवनेनहविषाप्रधानयागंकृत्वादुष्टमस्कनिक्षिप्यत्वनःसत्वनइतिहुत्वा
कृतीर्हुत्वाध्रुवाज्यान्विष्टकृदादिकुर्यात्॥नपुनर्यागः॥अवदानकालेपुरोडाशादौदो
षदर्शनेऽकृत्वंहविरप्सुप्रक्षिप्यस्रुवादानादिहविरंतरंनिरूप्यत्वनःसत्वनइतिहुत्वातेन
यागंकुर्यात्॥प्रधानहविषोपरस्परविपर्यासेमिश्रादिगणः॥त्वनःसत्वनइत्येतयोः

समुच्चयोवा॥प्रधानहविर्धर्मविपर्यासेत्वनः सत्वनइतिद्वयमिंदाकृतिद्वयं प्रायश्चित्तं॥अं
गहोमनामकरणेकर्मण्यसमाप्तेपुनर्यागः॥समाप्तेत्वनः सत्वनइत्याकृतीएवनपुनर्यागः
त॰ प्रधानदेवतोद्देशेविष्टकृतः प्राक्स्मरणेत्वनः सत्वनइत्याकृतीद्वेचमिंदाकृतीकृत्वाश्रपा
दनादिपुनरुत्पाद्ययागंकुर्यात्॥विष्टकृतस्तूर्ध्वंस्मरणेत्वसमाप्यपुनर्यागंकुर्यात्॥स
र्वत्रप्रस्तरविधृतिपरिधिबर्हिः शाखापवित्रपवित्रोपवेषवेदपरिस्तरणोधमनीनांछेदो
पघातादिनानाश्रोऽन्यतद्रूपंतज्ज्ञातीयंतत्परिणाहंतन्नमंत्रेणप्रोक्षणादिकृत्वातथासा
दयित्वात्वमग्नेअयासिप्रजापतेनत्वदित्येताभ्यांस्रुवाकृतीर्जुहुयात्॥पवित्रनाशेमिंदादि
गणेवाप्रायश्चित्तं॥प्राणभक्षात्प्रयाजादाहवनीयादंगारोबहिःपरिधिनिर्गच्छेत्तदं
गारस्योपरिमातपोमायत्तइतिमंत्रेणस्रुवमूलंनिधायामुंमाहिंसीरितिवदेत्तदिपु
रस्ताद्बहिष्परिध्यंगारोनिर्गच्छेदध्वर्युमाहिंसीरितियजमानंमहिंसीरितिवदेत्॥यदि
दक्षिणतःब्रह्माणंयजमानंचमाहिंसीरितिवदेत्॥यदिपश्चाद्धोतारंपत्नींयजमानमि
३१ तिं॥यक्षत्तरतःआग्नीध्रंमाहिंसीःपश्चन्माहिंसीर्यजमानंमाहिंसीरितिवदेत्॥स्रुवम् ३१

लेनांगारमनुप्रहरेत्॥सहस्रश्रृंगोवृषभोजातवेदाइति॥ब्रह्मणोक्तमिंदप्रायश्चित्तंकृत्वेमं
मीवेभ्यइतिस्रुवाकृतिंजुहुयात्॥प्रयाजायंगयज्ञानामकरणेइडेभ्यःस्वाहेड्यादिभिरेकै
वाकृतीर्जुहुयात्॥शाहतिभिश्च॥पिंडपित्रयज्ञलोपेस्वर्गार्थाहवनीयेपालिसंसर्गानात्मवैवि
ष्टकृतःपूर्ववासप्तहोतारंचतुर्थीहंजुहुयात्॥अंगयज्ञानामकरणेप्रायश्चित्तमेवनपुनर्या
गः॥प्रधानयज्ञविच्छेदेप्रायश्चित्तंकृत्वापुनर्यागःकार्यः॥यस्यदुष्कृतायोनयनतेसत्रैधा
तवीयेनयजेत॥त्रैधातवीयेष्टयाएष्टइतिसंकल्पः॥इध्मसंनहनकालेत्रयोविंशतिधेत्म
५ हः॥निर्वापकालेदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांजुष्टंनिर्वपामीतिचतुरोमुष्टीन्व्रीहीणांनिर्व
पति॥पुनर्दैवस्यत्वेतींद्राविष्णुभ्यामितियवानांचतुरोमुष्टीन्निर्वपति॥पुनर्दैवस्यत्वासा
ध्येंद्राविष्णुभ्यामितिचतुरोमुष्टीन्व्रीहीणांनिर्वपति॥निर्वापकालेस्रुग्दृषदुपलेनिर्वापः॥ना
नाबीजधर्मेणकिंशारुनिरसनादिकृत्वानिर्वपेत्॥अवहननकालेव्रीहीनवहत्ययवान
वहंति॥नानाबीजधर्मेणप्रस्कंदनांतंकुर्यात्॥पेषणकालेव्रीहीन्पेषयित्वायवान्पि
ष्टिकपालोपधानकालेदर्शकपालान्कपधायप्रथमंव्रीहिपिष्टानांसंवपनंकु

मा० त्वासंक्षाकैनेऽन्यस्मिन्पात्रेनिधायतस्यामेवपिष्टोदृपन्योयवपिष्टसंवपनादिकुर्यात्॥पि प्र०
ष्टपात्रीद्वयंवाऽधिश्रयणकालेप्रथमंव्रीहिमयंपुरोडाशमधिश्रित्यत्वंयाहयित्वातस्मा
परितोऽन्यायांसंयवमयंपुरोडाशंनिधायत्वंयाहयित्वानुपरितोपिष्टहतंव्रीहिम
यंपुरोडाशंनिधायत्वंयाहयित्वाऽपायेवीर्हिस्तंबयित्वाऽन्येनिरूप्यपर्यग्निकृत्वापुरोडाशा
नश्रपर्यग्निदेवोवःसविताश्रपयतुवर्षिष्ठेऽधिनाकेनिर्वपनुवंमातिधागित्यादिमंत्रान्
बहुवचनान्हेत्॥संक्षालनद्वयंसस्रज्यापेक्षोनिनयेत्॥स्योनेवःसदनंकरोमिघृतस्यधा
रयासुशेवंकल्पयामितस्मिन्सीदतमत्तेनितिघृताक्तीर्हियवानांमेधाःसुमनस्यमानाऽति
ष्ठद्वासनकालेपुरोडाशत्रयंयुगपद्देवोद्वासयेत्॥सूर्यज्योतिषोविभातस्वमऽग्ने॑ध्वंत्वंच
मऽग्ने॑ध्वंसुरूपान्वोवसुविदःपश्नांतेजसेंद्रावि॒ष्णुभ्यांत्वाऽग्निमिधारयामि॥श्रतंजर्त्सनि
जनितारोमतीनां॥आद्रा॑ःप्रथन्तुवोभुवनस्यगोपाः॥योवआत्मापशुषुप्रविष्टस्तमऽग्ने॑
ध्वंइति॥होतासमिध्यमानांसमिद्धवतींचांतरेणप्रसोऽग्नेतवोतिभिःप्रहोतापूर्व्यमि
२२ तिहेधाय्येआदधाति॥अनुहोतेत्यऽहुत्यऽग्नेर्वीतेवाजिनेतिपरिदधाति॥इंद्राविष्णु २२

भ्यामनुब्रूहीति॥माभैष्टमासंविजिघ्रंमावोहि॒ꣳसिषंमावस्तेजोपक्रमीत्॥भरतमुद्ध
रतेमनुषिंचतावदानानिवःप्रत्यवदास्यामिनमोवोऽस्तुमामाहि॒ꣳसिष्टेति॥यद्वदा
निवोवेद्यंतद्वाप्यायतांपुनः॥एकदासर्वेपुरोडाशाऽवतायक्षत्यक्षत्यथावषेत्॥इं
द्राविष्णूयज॥संवोकर्मणेत्यनुवाक्याऽभाजिग्यथुरिनियाज्या॥इंद्राविष्णोरहदेवयज्यया
वषट्कृतौ॥ऐंद्राग्नविध्येतोवा॥अभिघारयतिदक्षिणतः॥अन्वाहार्यमासाघ्यानमानेहिरण्यंतार्क्ष्यंचतानं
वासःधेनुंचदक्षिणाअग्नयेहिरण्यंसोमायवासःरुद्रायगामितिप्रतिग्रहमंत्रः॥पुनरालंभ
वर्जंसंतिष्ठते॥एवंत्रैधातवीयेनेष्वासंकल्पोत्तरयज्ञेनयजेतयोयक्ष्यऽइत्युक्त्वाधा
नादियत्किंचित्तत्तदादियेनयजतेसविभ्रष्ट्यायजेत॥इत्यायक्ष्यऽइतिसंकल्पः॥आ
ग्नेयमष्टाकपालंपुरोडाशंनिर्वपेत्सौम्यंचरुंनिर्वपेत्॥ऐंद्रंपुरोडाशंनिर्वपेत्॥पुरोडाशा
धिश्रयणात्पूर्वंआग्नेयपुरोडाशैकदेशंसौम्यंचरोरुपयंतंश्रुत्वानूऐंद्रपुरोडाशंसंस्था
पयेत्॥उभयोर्लोपंवाऐंद्रपुरोडाशेनिर्मार्ष्टिअधिश्रयणादिसमानंसप्रलवनिकाचे
त्याग्नेयस्यऽइंद्रंवोविश्वतस्परिऽइंद्रंनरऽइतिऽइंद्रस्यत्वंनःसोमयातेधामानीतिसोमस्य॥

अग्नेरहमन्नादः॥ इंद्रस्याहमिंद्रियावी॥सोमस्याहंमप्रजयाचेति॥पुनरालंभवर्जंसंतिष्ठते॥ प्र०
एवंविन्नेष्टिंकृत्वाऽध्वर्योस्त्वष्टयज्ञेनयजेत॥सर्वत्रविततेयज्ञकर्मणिजन्यंमयेयघा॥ग
लेतूयतइंद्रभयामहेस्वस्तिदाविशस्पतिरितिद्वाभ्यांस्रुवाकृतीप्रजापतिर्विश्विकर्मेतिचस्रु
वानिर्कृत्वाततयापगमेपुनर्यजेत॥करणेवदनाद्येमनःप्रयोगउपांशु॥अक्षरशोजपनानी
मन्नुपलब्धिर्ध्यानं॥तेषामुपलब्धिर्निगदः॥शब्दोपलब्धिमत्तूरसिमंद्रं॥कंठेमध्यं
शिरसितारइतिसमवायःस्थानानि॥ऋतिजांमंत्रोच्चारणकालेनुपांशुप्रायश्चित्तवाचः
स्थानानांभेदेषूदात्तादिस्वरभेदेषुअक्षरपदमात्राभेदेचाभिगृह्णीरितिस्रुवाकृतिः
प्रायश्चित्तं॥होतुरहेनस्वराद्यैर्मिंदादिगणैःप्रायश्चित्तं॥यजमानस्ययाजमानोच्चारणे
कालेस्वरादिभेदेषूभिगृह्णीरितिस्रुवाकृतिःप्रायश्चित्तं॥सर्वत्रेदमत्रकर्तव्यमित्यना
ज्ञातंप्रायश्चित्तेषुनाज्ञातंपुरुषसंमितइतिद्वेस्रुवाकृतीर्जुहुयात्॥सर्वत्रेध्माबर्हिरा
दीनांसंभारणंप्रयाजाद्यंगानांचस्रुवकरणेवचनाद्दर्वीवत्यस्याकरणेनिस्रुवाकृतिंजुहुया
त्॥सर्वत्रहविष्कल्पेपित्तेभानेनष्टदुष्टेविपर्यासेवस्तुकेऽनेअतिरिक्तेवायन्मआत्मनो २२

मिंदाग्नेपुनरग्निरितिद्वेस्रुवाकृतीर्जुहुयात्॥सर्वत्रस्कंदनेतत्रतत्रोक्तप्रायश्चित्तस्थानेनस
मुच्चयः॥पुरोडाशमप्रयाजादाज्यस्यस्कंदनेयजमानःसंत्वासिंचामीतिस्रुवेणमनुमंत्रयेत्॥अ
ध्वर्युर्भूतपतयेस्वाहेत्यादिनास्रुवेणमनुमंत्रयेतआत्मनःपुनरग्निरितिद्वेस्रुवाकृतीर्जुहु
यात्॥प्रयाजादूर्ध्वमाज्यस्यास्रुवेणस्कंदनेऽध्वर्युस्रुवेणमनुमंत्रयेतद्वा
कृतीर्जुहुयात्॥दर्शपूर्णमासादिषुहविर्यज्ञेषुविततेषुसर्वत्रअनादिष्टप्रा
यश्चित्तेषुद्व्यहसमस्रुचाहतीर्जुहुयात्॥चाहतिप्रसंगात्कपालन्यूनातिरिक्तादौप्रायश्चित्तं
कपालकरणेऽश्वशफमात्रस्थानंपरिकल्प्यतत्ररथचक्रक्रियाकारेणकपालान्युपदधाति॥
अश्वशफमात्रदेशेकपालद्वासदध्योर्याहतिभिःस्रुवाकृतीर्जुहुयात्॥अष्टाकपालपु
रोडाशेन्यूनातिरिक्तेषुसप्तकपालानांनवकपालानांचोपधानेकृतेचाहतिभिःतिस्रःस्रु
वाकृतीर्कृत्वाहीनेष्टाकपालमुपदध्यात्॥अतिरिक्तेऽतिरिक्तंकपालमुत्सृजेत्॥कपालाना
मसंहतोपधानेचाहतयःप्रायश्चित्तं॥कपालानामूर्ध्वप्रमाणमंगुलद्वयं॥अष्टाकपालो
पधानेसमचतुरस्राणिचत्वारिकपालानिवर्तुलाकाराणिचत्वारि॥एकादशकपाले

षुसप्तकपालानिचतुरस्राणित्रिकोणानिचत्वारि॥द्वादशकपालेषुअष्टौचतुरस्राणिचत्वारि त्रिकोणानिचत्वारि॥उक्तप्रमाणान्यूनातिरेकयोर्याहृतयः प्रायश्चित्तं॥पुरोडाशनिधान कालेकपालेभ्योहीनप्रथनेऽतिरिक्तप्रथनेचयाहृतयःप्रायश्चित्तं।कपालोपधानकालेनि हितांगारेषुपुरोडाशोपधानात्पूर्वमनुगतेआज्यंसंस्कृत्यमनस्वतीमाहवनीयेकृत्वापुनःकपाले ष्वंगारंप्रत्यूहेत्॥पुरोडाशादोहविषस्तेरुद्रायत्वाहेतिस्रुवाकृतिंजुहुयात्॥हविषोद्र वेवायवेत्वाहेतिस्रुवाकृतिंजुहुयात्॥विदग्धेनिर्वृतयेत्वाहेतिस्रुवाकृतिंजुहुयात्॥ह वि षामतिदाहेमिंदादिगणःप्रायश्चित्तं॥अतिदग्धहविषःप्रधानाकृतिमात्रंसंभवेमिंदादि गणंकृत्वादग्धप्रदेशादवदाययजेत्॥स्विष्टकृतोदेरवदानासंभवेऽवद्यन्याज्यस्विष्टकृदा दिकुर्यात्॥यदिसर्वमेवदग्धंस्यात्दग्धमपक्वप्रक्षिप्यमिंदाकृतीर्कृत्वाप्रदानप्रभृति हविरंतरंनिरूप्ययागंकुर्यात्॥क्षिप्तकर्तव्यतानिमित्तप्राप्तौध्रुवाज्येनप्रधानयागंकुर्यात्॥तत्रमिंदादिगणःप्रायश्चित्तंकृत्वापुनर्यागंकुर्यात्॥बहुहविष्केकर्मण्येकस्यनाशेऽज्येनेहिसमाप्यमिंदादिगणंकृत्वापुनरपिनामेवेष्टिंकुर्यात्॥चरोश्चप्यमाणेप्राग्दिशोता

DR BHAU DAJI MEMORIAL

पादुत्सिक्तेऽग्नयेस्वाहेतिस्रुवाकृतिः॥यदिदक्षिणतोयमायस्वाहेतियदिपश्चाद्दक्षिणायस्वा हेतियदुत्तरतःसोमायस्वाहेतिस्रुवाकृतिःपुरस्तात्सर्वतोऽस्तंकेसर्वाआकृतीर्जुहुयात्॥वि दिक्षूत्सृष्टेकेचाहुतीर्जुहुयात्॥उत्सिक्तंचरुमाज्येनाप्याययतिआप्यायस्वसमेतयोंसीतिद्वा भ्यामिंदाकृतिभिश्च॥चर्वादीनामतिस्रावेदुर्गादिगणःप्रायश्चित्तं।हविषामुद्वासनकालेपु रोडाशादौपतितस्फुटितेऽवदानेसंसर्पणेवंडितेस्थानांतरगमनेऽतानेद्व्योर्बहूनांवा विपर्ययेहविरंतरेणांतरितेषुनिमित्तेषुयाहृतीर्कृत्वाहुतीरुत्सादेवेधुत्करेणोदग्गत्वा पुनर्याहुतीरातमितोऽवदानकरावंतरेणयाहुतीर्वदन्प्रविशेत्॥पतनादिषुगुण विशिष्टपुरोडाशीयथापूर्वमुद्वास्यपात्रांतरेप्रक्षेपेनसार्पिषावसिच्यदक्षपात्र्यांनिधाय वेद्यांबर्हिस्तत्रैवासाद्यकिमुत्पतसीत्यादिमंत्रेणाग्निमंत्र्यब्रह्मणेगांवरंदत्वांतर्वेद्यासा द्ययजेत्॥अन्यथेतुकुर्वन्याद्देपितेनश्यतिप्रजाग्निर्नेसंसर्पणेचापियजमानःप्रमीय ते॥यस्याग्निष्टपुरोडाशस्योद्वर्तनंतंसमाप्यसुरग्निमेष्ट्वायजेत्॥इष्ट्वायक्ष्यन्नि संकल्पः॥अग्नयेसुरग्निमतेऽष्टाकपालंनिर्वपेत्॥गंधवतीभिःप्रोक्षणीभिःप्रोक्षणा

दिकुर्यात्॥ गंधर्वंतमृत्विजः प्रचरेयुः॥ अग्निर्होतानिषसादायजीयान्साध्वीमकरिति या
ज्यानुवाक्ये॥ अग्नेः सुरभिमतोहमन्नादः॥ पुनरालंभवर्जं संतिष्ठते॥ यस्याग्नेरोपुरोडा
श्रास्यवेपनंतंसमाप्यतंतुमतीमिष्टिंकुर्यात्॥ सापूर्वमेवोक्ता॥ यस्याग्नेरोपुरोडाश्रास्यवे
दनंतंसमाप्यायुष्मतीमिष्टिंकुर्यात्॥ इष्यायक्ष्यइतिसंकल्पः॥ अग्नयेआयुष्मतेष्टाकपाले
पुरोडाशंनिर्वपेत्॥ आयुष्टेविश्वतोदधायुर्दाअग्नेऽतियाज्यानुवाक्ये॥ अग्नेरायुष्मतोह
मन्नादः॥ पुनरालंभवर्जंसंतिष्ठते॥ यस्याग्नेरोसंसर्पणंतंसमाप्यात्मीयजमानक्षत्रे
ष्टिमाहृतांकुर्यात्॥ अथवाग्नेरोसंसर्पणेवाप्राजापत्यांशतकृष्णलकामिष्टिंकुर्यात्॥ यो
मत्योविभियात्तस्माएतामिष्टिंनिर्वपेत्॥ इतिआयुर्ध्येशतकृष्णलेष्यायक्ष्यइतिसंकल्पः
पात्रासादनकालेनवंचरुपात्रमासादयेत्॥ शलूखलादीनांनप्रयोजनमवहननाभावा
त्॥ प्रणीताप्रणयनकालेघृतेपणयेत्॥ घृतंप्रणेष्यामीतिवदेत्॥ कृष्णलप्रमाणानिश्रा
तंसुवर्णानिगुंजाकाराणिकृत्वापात्र्यामोप्यदेवस्यत्वेत्यादिप्रजापतयेजुष्टंनिर्वपामीति
३५ कृष्णलान्यभिरूप्यप्रोक्षणानंतरंध्रुवेमादायेत्यादि॥ चरुस्थालीमधिश्रित्यतस्यांतिरः ३५

पवित्रमाज्यमानीयतेरःपवित्रंचरुधर्मेणकृष्णलानोप्यभपयेत्॥ आज्यंनिरूप्यपर्यग्निकृत्वा
चरुधर्मेणोद्वास्यवेघामासादयतिप्रागाकालेऽपस्तरणमग्निधारणंचनविद्यतेचत्वारि
कृष्णलानिप्रथमावदानंद्वितीयंचतथैवएवमष्टौकृष्णलानिचरुस्थाल्यांस्थितान्येनस
हावद्येत्॥ पंचावत्तिनामवदानत्रयस्यद्वादशकृष्णलान्यवद्यति॥ हिरण्यगर्भःसमवर्त
ताग्रेप्रजापतेनत्वदेतानीतियाज्यानुवाक्येहवनकालेआज्यमेवजुहोति॥ नकृष्णलानि॥
आज्यमेवप्राश्नंति॥ प्रजापतेरहंप्रजयाचेति॥ चत्वारिस्विष्टकृतेवर्षेति पंचावत्तिनस्रु
वेआज्यमेवजुहोति॥ कृष्णलानामेकेनसहआज्यमेवजुहुयात्॥ वाअष्टाविंशायैचत्वा
र्यंतरेऽग्नयेआज्येनसहप्राशित्रस्यैकंनचतुर्धाकरणंचतुर्धाकरणकालेचरुपात्र्यां
निष्टानिपात्रांतरेनिधायब्रह्मणेप्रयच्छति॥ अवतानिकृष्णलानिब्रह्मणोहस्तेदत्वा
निचसर्वाणिसमंसतंविभज्यग्रहीरन्॥ सामान्यदक्षिणांहरान्नवा॥ नफलीकरणहो
मःपुनरालंभवर्जंसंतिष्ठतेशतकृष्णलामिष्टिंसमाप्यानंतरंपंचहविषीमायुष्कामे
ष्टिंकुर्यात्॥ आयुर्ध्यथमिष्यायक्ष्यइतिसंकल्पःआग्नेयमष्टाकपालंसौम्यंचरुं

वारुणंदशकपालंपुरोडाशंसारस्वतंचरुंआग्नावैष्णवमेकादशकपालंपुरोडाशंनिर्वपेत्॥ प्र०
आज्यावेक्षणकालेऽध्वर्युरग्नेर्जिह्वासियन्नयमेतिद्वाभ्यामवेक्षते।यन्नवमेदित्येतेनवाहवि
रुद्वासनानंतरंखादिरपात्रप्रवर्तंनिधायाभिघार्यहविर्भिःसहवेद्यामासादयति।आयुष्टेआयु
र्दाअग्नेरित्याग्नेयस्याप्यायस्वसंतेइतिसौम्यस्यअवतेहेडइतिवारुणस्य।प्राणोदेवा
नोदिवइतिसारस्वतस्य।आग्नाविष्णूसजोषसेआग्नाविष्णूमहिधामदित्याग्नाविष्णोः।अग्नेर
हमन्नादः।सोमस्यहंसुरेताः॥वरुणस्याहंधर्मभाक्।सरस्वत्याअहंवाचमभाषांअग्नावि
ष्णोरहंवीर्यवान्भूयासं।पुरस्तात्स्विष्टकृतआहुतीर्जुहोति।अश्विनोःप्राणोसितस्यते
दत्तं।ययोःप्राणोसित्याहकृत्वासंस्रावेणप्रवर्तंमभिघारयतिविराऽसीति।इंद्रस्यप्राणोसी वि॰
तिकृत्वाविराऽसीतिप्रवर्तंमभिघारयतिमित्रावरुणयोःप्राणोसीतिकृत्वासम्राऽसीतिप्रव
र्तंमभिघारयति।विश्वेषांदेवानांप्राणोसीतिकृत्वास्वराऽसीतिप्रवर्तंमभिघारयतिखादि
रंपात्रंप्रवर्तेनसहाग्नेराहवनीयंनीत्वादक्षिणेवेदिश्रोण्यामासादयति।पात्रस्थंमाज्यं
३६ यजमानमवेक्ष्ययति।घृतस्यधामस्तस्यप्रथमामेरयदित्येतेन।अथऋत्विजोब्रह्मणोह ३६

स्तमन्वारभ्यपरीतमासीनाआहुः।अथवाब्रह्मायजमानस्यहस्तंगृह्णाति॥इतरेऋत्विजोब्र
ह्मणोहस्तमन्वारभ्याहुः॥पवमानेनत्वास्तोमेनबृहद्रथंतरयोस्त्वास्तोमेनाग्नेस्त्वामात्रयेतिस्त्री
न्।अथयजमानोहिरण्यहारेणपात्रस्थंमाज्यंपिबति॥पिबंतमध्वर्युरनुमंत्रयते।इममग्न
तिायजमानआचम्यप्रवर्तंमुदूह्यप्रक्षाल्यदक्षिणेआबाधीतआयुष्टेविश्वतोदधदिति
प्रवर्तंमनुपरिवर्तयति।आयुरसीत्यादिसर्वमायुषंगमित्यंतेन।अथब्रह्मायजमानस्यह
स्तंगृह्णातिअग्निरायुष्मानीतिषड्भिःस्विष्टकृदादिसमानंपुनरालंभवर्जंसमिष्टे।ए
वमायुष्कामेष्टिंसमाप्याग्नयेपवमानायाग्नयेशुचयइतिपुरोडाशाहुतियुक्तामिष्टिंकुर्या
त्।प्रयोगःपूर्वमेवोक्तःआयुर्ध्यर्थंघृतस्तुतिंकुर्यात्॥ब्रह्मासनकालादन्यत्रपुरोडा
शापतनादौदुर्गादिगणःप्रायश्चित्तं।दोषदुष्टेनस्रुक्तेनवाहविषाआज्यानात्मधानयागे
प्रणवव्याहृतीर्जुहुयात्।कर्माज्ञानादिकैरितिस्विष्टकृतेतरमाज्यैश्चयत्कर्मकृतंतत्रसर्वत्रप्र
णवव्याहृतीर्जुहुयात्॥आज्यसोमचरुहविषांयागेपुरस्ताद्वपरिष्टाद्वाकृतीर्जु
हुयात्।अयागात्मकदीर्घत्रेषेअनादिप्रायश्चित्तंप्रणवव्याहृतीर्जुहुयात्॥ऋग्वेदविहि

नभ्रेषेश्रुतिगार्हपत्येजुहुयात्जुह्वासरुहीतेन।यजुर्वेदविहितभ्रेषेतथादक्षिणाग्नौ
भुवरितिजुहुयात्।सामवेदभ्रेषेतथासरुहीतेनसुवरित्याहवनीयेजुहुयात्।।यदिस
र्वतःसर्वाजुहुयात्।।अध्वर्योःप्रयोगकालेमंत्राणामप्रतीतौआग्नेयैर्मंत्रैरैंद्रैःप्राजापत्यै
र्वाजुहुयात्।व्याहृतिभिर्वाकुर्यादेवमंत्रत्वात्।यदाहोतान्यानुवाक्येमुह्येतदाग्नेयीभि
रैंद्रीभिःप्राजापत्याभिर्व्याहृतिभिर्वायजेत्।।यदायजमानोयजमानेषुमुह्येनवेकरा
वंतरेणव्याहृतीर्वदन्प्रविशेत्।।व्याहृतिभिरेवसर्वंयाजमानंकुर्यात्।।निष्क्रमणकाले
व्याहृतीर्वदन्निष्क्रमेत्।सर्वाक्रूरःसर्वाणियन्तेषिसर्वाणिसामानिपशव्याहृतयइत्या
चार्याःप्रेकुः।।अथहविर्दोषान्व्याख्यास्यामोयैर्हवीषिदुष्यंतितान्वक्ष्यामः।।अश्वदेहव
र्तिनीनीलमक्षिकागवामंगवर्तिनीशातिकातल्पवतीमकुणाचैलशिरोवर्तिनीप्र
कामलपिंडकारीकीटः।।श्वमार्जारनकुलमर्कटाःप्रसिद्धाः।ध्वांक्षःकाकःआखुर्म
षकः।।तेषांअन्येषांचपुरीषंमलःकेशाःप्रसिद्धाःसिकःपरिहितवसनोचलः।पदंपा
३७ दः।मृतनखस्छिन्ननखः।।कुनखोदुष्टनखःपुरुषःपरिदुष्टगंधवहोद्रप्सः।। मुखजो ३७

विप्रुषःस्वेदःप्रसिद्धः।।असृक्कुत्सितंरक्तंहीनासिकाकफः।।अश्रुनयनांबु।। कासःश्लेष्मा
क्षवथुःक्षुतं।आर्द्रव्रणंचेति।।एतैरुपहतं।वसाशुक्रमस्रक्मज्जामूत्रविट्कर्णविट्नखाः
श्लेष्माश्रुपूतिकास्वेदोदाद्रौतेनव्रणोमलाद्यैतैश्चोपहतंरजस्वलास्त्रीकाभ्यांस्पृष्टं
दृष्टं अप्रयतेनाशुचिनादृष्टंस्पृष्टंचाभ्रूणघ्नेनवा।।भ्रूणःपंचत्रिंशुःयज्ञगर्भिणी
बालघ्नोन्यपङ्क्तिः।एतेषामन्यतमेयोहंतिसाभ्रूणघ्नःतेनदृष्टंस्पृष्टंचाअपपात्रेणया
मचंडालादिनादृष्टंस्पृष्टंच।। ध्वजीचरजकोलोहकारःस्नाधिपस्तथा।तक्षकोवाग्दु
रितियामचंडालकाःस्मृताः।।अमेध्यदेशोवास्कन्नंयत्रप्रस्रवतेनारीम्रियतेदह्यतेपि
वा।। चंडालाध्युषितंयत्रयत्रविण्मूत्रादिसंगतिः।एवंकल्मषाभ्रूयिष्ठाभ्रूमेध्यप्रकीर्ति
ताएवंभ्रूतामेध्यदेशोस्कन्नंचाएवंदुष्टहविरप्रशस्तंतभस्मनिवाप्रक्षिप्यमिदाहुतीव्या
हृतीश्चहुत्वाभ्रूर्पाहानप्रभृतिहविरंतरमुत्थायप्रयतेत।अन्नाकोक्षिप्रकर्तयता
प्राप्तेआज्येनवायजेत्।।आज्यपक्षेमन्यतीप्रायश्चित्तं।क्षुद्रकीटमक्षिकापिपीलिका
दिवर्जं।क्षुद्रकीटोघृणादिः।मक्षिकापिपीलिकेप्रसिद्धे एषुप्रमादाद्विषुपतितेषुन

दोषः॥सर्वत्रक्षुद्रकीटमक्षिकापिपीलिकादीनामापंचभ्यनङ्कृत्याभक्ष्योत्सर्गंकुर्यात्॥ ५०
ऊर्ध्वंचेदुष्टमेवनिर्हरेन्निः॥दुष्टेनहविषायागेकृतेपश्चाद्दोषदर्शनेपुनर्यागोनकर्तव्यः॥
तथाहिकात्यायनः॥दुष्टेनहविषायागोनिवर्तेतोपश्चाद्दोषसंविभर्वतितत्कृतमेवेति
अदुष्टेनद्रव्येणपुनरावृत्तिरितिकेचित्॥अथसर्वयज्ञानांप्रायश्चित्तानिवक्ष्यामः॥हवि
र्विषयत्रकुत्रचित्स्कन्नभिन्नभग्नदुष्टविपरीताक्षरणंस्यदनस्रावितपतितस्फुटि
तनिमित्तेषुअश्वश्वानोविडालकाकखरमृगपशुपक्षिसरीसृपादिषुअशौनामंतरागते
त्विज्ञामंतरावागतेषुद्वादशाग्रहीतेनस्रुचंपूरयित्वादुर्गामनस्वतीतिस्तोमहविर्याहुतीर्जु
हुयात्॥अनसोंतरागमनेपथिकृदिष्यासहदुर्गादिगणस्यसमुच्चयः॥सर्वत्रयस्यक
स्यचिद्विपर्यासेमंत्रस्यमात्रादिराहित्येनोच्चारणेब्राह्मणमात्रस्यात्विज्यार्थेवरणेदर्भमात्र
परिग्रहेऽध्वमात्रबर्हिर्मात्रपरिधिमात्रमंत्ररहितपरिग्रहेस्रुवारणीकृष्णाजिनमात्रपरि
ग्रहेषांमध्येमंत्रवतोमंत्रराहित्येजातिमात्रपरिग्रहेआसादनादुपरिप्रोक्षणात्सर्वेक
३८ पालनाशोत्रुक्कानांयस्यकस्यचिन्नाशोयत्राप्यंपत्रेणनआहत्यहोतव्यमित्यादोप्रणी ३८

तमात्रस्यलौकिकाग्नेर्नाशेप्रणीमिन्नेषुअनादिष्टप्रायश्चित्तेषुचआज्यस्थाल्यांस्रुवेणो
पहत्यहोतिप्रजापतयेस्वाहाहिरण्यगर्भायस्वाहाभूरण्यांपतयेस्वाहाकाश्यपायस्वा
हाचतस्रोमहाव्याहृतीर्व्याहृतीश्चएवंद्वादशामंत्रान्प्राजापत्यगणः॥मंत्रहीनेकर्मणिमं
त्रेणातिरिक्तेमंत्रेदुरधीतेनोच्चारणेधर्मरहितेदुर्ब्राह्मणोधीतेवादुराधीतेवाकर्ममध्येदुः
वि॰ स्वप्नाद्यावनागतेवषट्कारेऽतीतेवाहविष्कृतेहविष्यनग्नौप्रक्षिप्तस्यहविषो
मेरन्यत्रगमनेहोतुर्हीनस्वरेणविगुणेकर्मणिहविषामतिदाहेप्रधानयागार्थंवदान
ट्ठयच्चातिरिक्तस्यातिदाहोयदाभवतितदाप्रायश्चित्तंयदेडास्विष्कृतोरथवदानलो
भःतदानेतत्प्रायश्चित्तं॥उक्तंचयद्यवदानानिविंदतिनात्रप्रायश्चित्तंकुर्वंतियदासर्व
दाहस्रदाक्रर्षादानप्रभृतिहविरंतरमुत्पाद्यमिदाकृतीकृत्यायज्ञेदाज्येनवाप्रचरेदिति
पूर्वमेवोक्तं॥यस्मिन्कस्मिन्श्चित्पात्रेभिन्नेप्रोक्षणादुपरिउपधानात्सर्वेकपालनाशो
भेदेवाचतुष्पथादिरूत्विग्भीनामंतरागतेपवित्रस्यनाशेहविषांविपर्यासेरूत्विजा
मनिष्टंप्रपतेदितरेतरकर्मणिरूत्विजांपरस्परंद्वैधीभावेचएषुनिमित्तेषुमिदादिगणो

नप्रायश्चित्तंकुर्यात्॥यन्मआत्मनःपुनराग्निरितिहैवास्यसमस्तयाहुतयश्चतस्रःप्रणवःय
श्चिद्धितरनितिस्वस्तंतुतन्वन्नुद्ध्यस्वाग्नेत्रयस्त्रिंशात्तंतवरतिनिस्रःअन्वग्निःमनोज्योतिःमहाश्वा
हुतयश्चतस्रःसप्ततेअग्नेप्रजापतयरतिएकविंशतिमंत्रोमिंदादिगणः॥पवित्रनाशोत्तमन्तेअ
यासिप्रजापतयरत्यनयोर्मिंदादिगणेनसमुच्चयः॥पात्रभेदेधरायुर्मरतिमिंदादिगणेनस
मुच्चयोऽर्गादिगणेनवा॥प्रोक्षणप्राप्तकपधानात्पूर्वंकपालेनष्टेभिन्नेभिन्नेकपालंन्यूनकरे
न्नदस्यति॥अभिन्नोघर्मोजीरदानुरितिचतुर्गृहीतमाज्यमाहवनीयेजुहोतिइध्मोवेदिःप्र
स्तेतद्धाग्निस्वाहेतिमिंदाज्यंकृत्वाप्राजापत्यंचगणंकृत्वान्यत्कपालमुपनिधायाग्निस्था
नेघर्मोदेवानिति॥उपधानप्राप्तेतिन्नदासनीतेयदाकदावाकपालेभिन्नेन्यूनकरेन्नदासना
दिमिंदादिगणहोमांतंप्रायश्चित्तंकृत्वास्वस्तानेयत्कपालंतन्मंत्रेणोपधायाग्निस्थाने
घर्मोदेवानिति॥उपधानप्राप्तेतिपुरोडाशनिधानात्पूर्वंनउपहितंकपालंनश्येन्नहानीमेव
कपालनाशेहविंकुर्यात्॥कपालनाशेस्यायक्ष्यइतिसंकल्पःविहृतत्वात्तेषवेग्निष्वन्वा
धानादिबर्हिःसंनहनंकृत्वाऽध्वसंनहनेनतस्त्वाऽविऽन्नातिधेत्यृचः॥व्रतोपायनंनास्ति

वेदःप्राकृतएवपरिभोजनीयंच॥अस्याग्निहावदृष्टार्थान्यंगानिनिवर्तंतेदृष्टार्थमपिवि
रुद्धंचनिवर्तते॥स्रुक्तंपात्रंयत्तूनरुप्तंनायासादयेत्॥त्रीणिकपालानिएककपालोहास
नार्थंपात्रंवासादयेत्॥पाणिसंमार्गंपरिस्तरणब्रह्मोपवेशनंस्यात्स्तरणंपवित्रकरण
प्रणीताप्रणयानिरुक्तत्वात्संति॥सुगादानादिअश्विभ्योजुष्टंनिर्वपामिघावापृथिवीभ्यां
जुष्टंनिर्वपामितिहविर्द्वयंनिरूप्यपूर्वसंस्कृतप्रोक्षणीनांअर्द्धप्रकृतेस्यर्थेपात्रांतरेनिधा
यार्द्धननिरूप्तंहविर्द्वयंसादितपात्राणिप्रोक्ष्यावघातादिपिष्टप्रकरंदनांतंकुर्यात्॥पूर्व
मुपहितकपालानांउत्तरतआश्विनंहिकपालमुपधायघावापृथिव्यमेकंकपालमुप
धायसंवपनानिपुरोडाशनिधानांतंकुर्यात्॥पूर्वमाज्येनिरुप्तेनिरुप्तस्यार्थंप्रकृतेस्यर्थं
पात्रांतरेनिधायार्द्धनसहपर्यग्निकरणंकुर्यात्॥अनिरुप्तंचेदाज्यनिर्वापादिकुर्यात्॥
आग्नेयेनिनयेत्॥कपालनाशेहिःपौर्णमास्योचेद्दर्शादानादिवेदीकरणंभवेत्॥
अमावास्योचेदुत्तरपरियाहादिपत्नीसंनहनं॥ध्रुवायामेवाज्यग्रहणं॥एषाअसदद्दिति
ध्रुवायाआसादनं॥विधुनीस्थोवैष्णवेधामनीस्थःप्राजापत्येऽतिध्रुवामाज्यस्थालीं

चाग्निमंश्चाश्विनं पुरोडाशमुद्वास्यैककपालं पात्रांतरेऽवद्वास्याज्यं बर्हिरानीय विःएष्टंरु ॥प्र०
त्वा वेद्यामासाद्याथेध्मास्मिधमित्यादि॥अध्वारहयंनास्ति। परिध्यग्निसंमार्जनंकृत्वाप्र
वराश्रावणंकृत्वास्रुगादापनंध्रुवाज्यात्स्रुवेणजुह्वांस्रुक्त्वेतिचतुर्गृहीतमाज्यंगृह्णीया
त्॥यजमानःपंचानांलेख्यादिभिश्चतुर्भिरनुमंत्रयेत्॥उपभृतिज्योतिस्त्वेतिचतुर्गृहीया
त्॥यजमानश्चरोस्त्वेत्यादिभिश्चतुर्भिरनुमंत्रयेत्॥पंचप्रयाजानिष्वाशेषेणपुरोडाशाद्य
मभिघारयति॥नाज्यभागौहविर्भ्यांचरतिअश्विभ्यामनुब्रूहीतिअश्विनौयजेतिअश्वि
नावचसेनिहयेवां॥अविष्टंधीष्वश्विनाहुवेहिअश्विनस्याश्विनोरहमिंद्रियाय्यभादः॥
द्यावापृथिवीभ्यामनुब्रूहिद्यावापृथिवीयजद्यावानःपृथिवीप्रपूर्वजेपितरेति॥द्यावा
पृथिव्यस्यद्यावापृथिव्योरहमभयोर्लोकयोरुध्यासं॥एककपालमपर्यावर्तयन्नाप्रति
ष्ठितमखंडितंसर्वहुतंजुहुयात्॥स्विष्टकृदादिएककपालाश्चायसर्पिषास्विष्टकृदादि
कुर्यात्॥इडामार्जनानंतरंअग्निसंमार्जनंकुर्यात्॥अनुयाजानसंति॥वाजवतीभ्योस्रुचौ
ऋक्सस्कृत्विमोक्षांतंकुर्यात्॥पत्नीसंयाजानसंति॥दक्षिणवह्निकोहोमोकृत्वायोक्षंमंत्रेण ॥प्र०

सविमुच्यबर्हिःसमाप्यप्रहरेत्॥नसमिष्टयजुर्होमः॥विष्णुक्रमास्त्रयंते॥एवमिष्टिसमा
प्यचतुर्गृहीतमाज्यमाहवनीयेजुहोति॥इध्मोवेदिरिति॥अन्यत्कपालंप्रक्षाल्यप्रोक्ष्यस्व
स्थानेतन्मंत्रेणोपधायघर्मोदेवानित्यभिस्मरति॥एवंकपालनाशोष्टिसमाप्यप्रकृतामि
ष्टिंकुर्यात्॥पुरोडाशोद्वासनकालेकपालनाशश्चेद्वीक्ष्यहास्यविस्रायेनिधायकपाल
नाशेष्टिंकुर्यात्॥इष्ट्वायक्ष्यइतिसंकल्पः॥तेषेवाग्निष्वन्वाधानंबर्हिःसंनहनंनास्तिइध्म
संनहनकालेपरिध्यूर्ध्वसमिदनुयाजसमिद्बर्हिर्नस्थाने पंचदशाधेत्सरुः॥निरूढपशोरा
लभनात्पूर्वंउत्तरेणगार्हपत्यंश्रोत्रासाद्यपवित्रेकृत्वावेषायत्वेतिशूर्पादाज्यादिहविर्द्रव्यंनिरू
प्यश्रपणांतंकुर्यात्॥आज्यस्थाल्याज्यमर्हपात्रांतरेआनीयजघनेनगार्हपत्यमाप्योयो
नीयहविषोऽवद्वास्यजुह्वानुपभृतिचतुर्गृहीतमाज्यंपात्रांतरेनिधायजुहूपभृतावा
साद्यध्मास्मिधमादायेत्यादिहविर्भ्योप्रचरतिध्रुवाज्यादुपस्तरणांतंचारएवास्विष्टकृ
दादिइडामार्जनांतंकृत्वादक्षिणवह्निकोहोमोकृत्वाऽनंतरमाहवनीयेचतुर्गृहीतमाज्यं
जुहोति॥इध्मोवेदिरिति॥अन्यत्कपालंतत्स्थानेतन्मंत्रेणोपधायाग्निमंत्रयेत्॥घर्मो

देवानिति एवंकपालनाश्रोष्टिं समाप्य पात्रांतरे घृतमाज्येजुह्वामुपरिष्टाच्च प्रत्यानीय वेषौ
स्वस्थाने सादयित्वा विश्वायेस्थिताभिहवींष्यंतर्वेद्यामासाद्याथेध्माधित्यादि प्रकृतामिष्टिं
कुर्यात्। यद्वोपधानानंतरं यदा कदा वा कपालंनश्येत्तदा कपालांतरं प्रक्षाल्य प्रोक्ष्यमनो
ज्योतिरधोवेदिरितिहुत्वा नष्टस्थाने कपालं मंत्रेणोपधाय घर्मो देवानि
त्यभिमंत्र्य प्रकृतामिष्टिं समाप्य पुनर्विहृत्य अग्न्याधानादि अविकृतं कपालनाश्रोष्टिं
कुर्यात्। यद्येक कपालः सर्वतः पर्यावर्तनाध्वर्युः स्वस्थाने प्रतिष्ठापयेत्। प्रजापतेर्व
र्तनिमनुवर्तस्वेति यजमानः प्रतिक्षत्रेप्रतिष्ठामिराहविश्वमन्यामिवाध इत्याभ्याम
नुमंत्रयतो ध्वर्युरुल्कांद्यौः पृथिवीमल्कानुर्वीत्यनाभ्यां हुत्वा कुतीर्जुहुयात्। प्रकृ
तामिष्टिं समाप्य संस्थितायामेककपालपुराडाशापर्यावर्तनार्थं वैश्वानरीयामिष्टिं कु
र्यात्। सापूर्वमेवोक्ता। अथैकाध्वर्यवप्रायश्चित्तं दर्शपूर्णमासयोश्चत्वारऋत्विजः ते
षामेकस्मिन्नविद्यमानेसर्वप्रायश्चित्तंहुत्वात्रयः प्रचरेयुः। द्वयोरभावेद्विवारंसर्वप्रा
यश्चित्तंहुत्वाद्वौ प्रचरतः। यदाध्वर्युर्यजमानोतदासर्वप्रायश्चित्तंत्रिवारंहुत्वाकर्मकु

र्यात्। यदायजमानएकएवतदापिचतुर्वारंसर्वप्रायश्चित्तंहुत्वायजमानोंतर्वेद्यासीनो
वक्ष्यमाणंकृत्वासर्वंकुर्यात्। तदायजमानएकएवकुर्यात्। तदासत्रिणामिवदक्षिणान
लभ्यते। यदाध्वर्युरेकएवयजमानोऽसंनिहितोवासमर्थोवा तदाहयजमानइतिलिंगा दे
काध्वर्यवप्रायश्चित्तंकुर्यात्। सर्वदाऋत्विक्कोमासविषयंप्रायश्चित्तंपुराप्रयाजेभ्योजुहुया
त्। तत्रप्रयोगक्रमः। अध्वर्युरिडादेवहूरितिचतुःकृत्वोजपित्वाचतुर्णामपिकर्माण्यध्वर्युरे
कएवकरोतियुगपत्करणीयानिक्रमेणकुर्यात्। हवींष्यंतर्वेद्यासाद्यहविषांपश्चाद्दे
मासीनःस्वयंसर्वादेवतायजतिअग्नयेसमिध्यमानायानुब्रूहीत्युक्त्वाजपेत्। वंसमिधे
नीरनुवनूसमिधोयाधायवेदोपवाजनंकृत्वाग्नेमहाँअसिब्राह्मणाभारतेत्यंतमुक्त्वा
ऽग्नेऽअयाडिवेहूतिहविरभिघारयेत्। जपित्वाग्नयेसमिध्यमानायानुब्रूहीत्युक्त्वाजपेत्। वंस
माघार्यमनोसीत्युक्त्वातिष्ठद्वेवहूरित्यादि आवहजातवेदःसयजायजेत्यंतंवदेत्। जप
त्रिरयादितिमतित्यादितृंहन्तीत्यंतमुक्त्वाप्रेषपूर्वकमग्निसंमार्जनंकृत्वाभुवनमसीति
स्रुच्यमाघारमाघार्यानुमंत्रणंकृत्वाश्रावययसंदेवेषित्यादि ब्रह्मवर्चसायेत्यंतमु

त्काति षेचनाश्रावणादिकृत्वासोमानुषङ्गतिस्तनामोत्कोपविश्यदेवसवितरेतंत्वाहृणेतरथं
नमुत्कोतिष्ठेत्॥ उदाशुषेत्यादिवदनमुखसंमार्जनंकृत्वावेधांदर्भमपासनेऽहेदेधिषद्योत
दृङित्यादिनोपविश्यभरूपनयङित्यादिममहोत्रंजुषध्वमित्येतमुत्काऽज्यस्थाल्यासुवेणैका
ध्वर्यवप्रायश्चित्तमष्टावाज्याहुतीर्जुहुयात्॥ जुषोवाचोभरयासमिमामेवाग्निनायज्ञस्यवो
तारमिंद्रंयन्मेमनश्चिद्रंयद्धिहोसोयदविद्वांयंतरिक्षं। ब्रह्मत्वेहोत्राअध्वर्यवेऽहंब्रह्मा
हंहोतेतिएवमष्टाभिराहुतीर्हुत्वास्रुगादायनमुत्कोवे यामासीनएवाश्रावणादिकंकृ
त्वायथोक्तदेवताःक्रमेणयजेत्॥ प्राग्निरग्निरावदानंसुरूपाभिमंत्रणंचकृत्वायवंजिनम
वांतरेऽवोक्षसक्थेनहस्तेनकृत्वेडामुपहूयचतुर्गृहीतंकृत्वाऽवांतरेऽवांप्राश्येडाभक्षणंकृत्वाज्ये
नमार्जयित्वाहोत्रमार्जनंचकृत्वाप्रैषपूर्वकंप्राशित्रंप्राश्यब्रह्मापिन्वस्वेत्याघ्न्वाहार्यंस्वयंगृ
ह्णीयात्॥ संप्रैषपूर्वकमन्वाधानादिकर्मतर्पणांतंकुर्यात्॥ दर्शपूर्णमासयोःपर्वण्यन्वाधानंप्र
तिपदियागः॥ पर्वणआधास्त्रयोयागाअन्वाधानस्यकालः॥ [illegible]
६२ [illegible]॥ पर्वणश्चतुर्थांशःप्रतिपदश्चआधास्त्रयोयागकालः॥ ६२

+ यागकालः॥

यदापर्वण्यस्तमयात्पूर्वंक्रांतसप्तदशघटिकासिनःप्रतिपत्तिथिप्रवेशस्तस्मिन्न
हनियागः॥ पूर्वेकरन्वाधानं॥ तथाचर्क्षनिः॥ पक्षांतानुपवस्तव्याःपक्षादर्योमियष्टव्याइति॥
यथाहभवस्वामी॥ त्रीनंशानोवस्तव्यायागस्यचतुरोविदुः॥ द्वावंशावुत्सृजेदंतौयागेचत्रत
कर्मणि॥ पंचदश्याःपरःपादःपक्षादेःप्रथमास्त्रयः॥ यागकालःसविज्ञेयःप्रातरुक्तोमनीषि
भिः॥ पर्वणोयश्चतुर्थांशआद्याःप्रतिपदस्त्रयः॥ देवयागस्यकालोयंनान्यःकालोविधीयते॥
चतुर्दश्यांचतुर्भागेप्यमायत्रदृश्यते॥ श्वोभूतेप्रतिपद्यत्रस्नेक्ष्यादिकीक्रिया॥ इष्टिप्रयो
गप्रयासेप्रविष्टेप्रतिपत्तिथौ॥ यष्टव्यमपराह्णेपिनालंचेदुत्तरेहनि॥ इष्टेरलंसाप्रतिपत्क्षणा
ज्यःसप्तदश्यस्यादिवसेभवेति॥ क्षीणसुतकर्मतिथेरिहाद्यःकालोथरेद्वासुभवेद्द्वितीयः
प्रतिपत्सूर्यभागाद्यैहीनेवापर्वणोधिके॥ सप्तदशवरनाड्योहिप्रतिपच्चेदलंयजेत्॥ यस्मि
न्नहनिचंद्रोनदृश्यतेऽपरात्रेपिवा॥ पित्र्योनिर्वपितिथिर्नास्यधौदैवपैत्रकौ॥ द्वितीयात्रि
मुहूर्तावैत्यतियत्नापराह्णिकी॥ अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनात्॥ अल्पत्वात्संधि
कालस्यप्रयोगस्तुपपद्यतेनः॥ दर्शपूर्णमासाभ्यांनसंधिसामीप्यलक्षणापौर्णमास्यांए

र्णिमास्यायजेतेत्यादिकेविधौऽपूर्णमासीशब्दवाच्येसंधिपूर्वोत्तरेतिथीइतियथाहगोपालः
पक्षादौपक्षयोःसंधेःसंनिकृष्टतरंदिनंपौर्णमास्यांप्रधानानिकर्तव्यान्यत्रनोयुक्तः॥यागा
न्वाधानयोर्मध्येपर्वसाध्येवपक्षयोःकिंतुसंधेःप्रधानानोसंनिकर्षेनिषेक्षितःअन्योदिनो
तेराद्योवाप्राहेष्टिसंधियागयोःसंनिपातमनसीनकालेहोमोपनाकृतःअमावास्यास्यपूर्व
स्करदृष्टेंदुःप्रदास्यतेदृष्टचंद्रमहर्गौणंयागस्यादपरेहनिइतिद्वेधोदिनाःपक्षाभवस्वामि
मतानुगाः॥मुख्यकालाइमेप्रोक्तागौणाअर्वाक्पूर्वणः॥तत्रःपार्वणयोर्मुख्यःकालःपौ
र्णिमास्याइष्टेरमावास्यातिथेरर्वागौणःकालः।अमावास्याइष्टेःपौर्णमासीतिथेरर्वागौणः
कालः।आपत्सुगौणकालेस्यादिष्टिः।अनापदिगौणकालेइष्टिंनकुर्यात्॥कुर्याच्चयथोक्त
प्रायश्चित्तपूर्वकामिष्टिंकुर्यात्॥आपत्कगौणकालेकुर्वन्प्रायश्चित्तंनकुर्यात्गौणएतिकां
तेप्रायश्चित्तंकुर्यात्।तत्रद्वेधोदिनाःपक्षालिख्यंते।एकैकस्मिन्पर्वण्येतिकांतेपाथिकृती
मिष्टिंवैश्वानरीमिष्टिंचपृथक्तंत्रेणकुर्यात्॥अतिपन्नयायजेत्॥एकस्मिन्पर्वण्येतिकांते
पाथिकृतीमिष्टिंवैश्वानरीचसमानतंत्रेणकुर्यात्तदा॰पन्नयागःयद्वाएकैकस्मिन्पर्वण्येति

४३

नाति

कांतेपाथिकृत्वावैश्वानर्यावासहातिपन्नोसमानतंत्रेणयजेत्॥पद्वाएकैकस्मिन्पर्वण्येतिकां
तेप्राप्तकालस्यदर्शस्यपौर्णमासस्यवायआग्नेयोष्टाकपालस्तमवाग्निंपथिकृदुत्तरविशिष्टं
कृत्वायजेत्॥आवाहनादिनिगदेषग्निंपथिकृतंनिर्दिशेत्।तदानातिपन्नयागः॥अथवा
पूर्णाहुतीराज्यभागानंतरंकुर्यात्॥प्रायश्चित्तं॥एतेचत्वारःपक्षाःअथवाअमावास्यानिक
मेपथिकृदिष्टिःपौर्णमास्यनिकमेवैश्वानरेष्टिःप्रायश्चित्तं।दर्शपूर्णमासयोरुभयोरप्यनिक
मेपथिकृद्वैश्वानर्यौसमानतंत्रेणनिमित्तंतंत्रेवाकार्येऽयंपंचमःप्रायश्चित्तसूत्रोक्तःपक्षः
बहूनांनिमित्तानामारब्धौनैमित्तिकस्याप्याकृतिः॥यद्वाबहूनांपर्वणामतिक्रांतौबहूपवाति
क्रमप्रायश्चित्तार्थमन्वारंभणीयांकृत्वातिपन्नयागार्थंपाथिकृद्वैश्वानर्यौसमानतंत्रेणप्रति
निमित्तमावर्तंसर्वातिपन्नयागार्थंसकृद्वापाथिकृद्वैश्वानर्यौसमानतंत्रेणप्रतिनिमित्तमावर्त्त
तेसर्वातिपन्नयागार्थंसकृद्वापाथिकृद्वैश्वानर्यौसमानतंत्रेकृत्वानंतरमतिपन्नयायजेत्।
अप्रारब्धस्यदर्शस्यपूर्णमासस्यवात्ययेप्रायश्चित्तं।इदंपूर्वोक्तमतिपन्नेप्रायश्चित्तंषण्मा
सादर्वाग्नयति।दर्शपूर्णमासेष्टीयदिषण्मासाभ्यंतरेनाग्नयेपथिकृतेग्नयेतंतुमते

ग्नये वैश्वानरायाग्नयेव्रतपतयेऽग्न्याहिताग्नेर्दर्शपूर्णमासयोरग्निहोत्रादिपात नोक्तांश्चतुर्हविष्काग्निष्टिंकृत्वातिपन्नया
गार्थंपाथिकृतीं वैश्वानरींचसमानतंत्रांकृत्वाप्रतीष्टिसर्वार्थंसकृद्वानंतरमतिपन्नयायजेत्॥
संवत्सरपर्यंतदर्शपूर्णमासयोरतिपातेऽग्नयेपवमानायाग्नयेपावकायाग्नयेशुचयेग्नयेप
थिकृतेग्नयेतंतुमतेग्नयेवैश्वानरायाग्नयेव्रतपतयऽइत्याग्निहोत्रादिपातनोक्तांसप्तहविष्का
ग्निष्टिंकृत्वातिपन्नयायजेत्॥अग्निष्टुत्समारूढेपुनर्दर्शपूर्णमासानांबहूनामकरणेग्नयेशु
चयेष्टाकपालपुरोडाशमेकंनिर्वपेत्कृत्वाऽग्नयेपथिकृतेष्टाकपालपुरोडाशमेकंनिर्व
पेत्कृत्वाअग्नयेपवमानायाष्टाकपालमेकंनिर्वपेत्कृत्वाग्नयेतंतुमतेष्टाकपालपुरोडाश
मेकंनिर्वपेत्कृत्वाएवमग्निहोत्रादिपातनोक्तांश्चतस्रइष्टीःकृत्वातिपन्नयागार्थंपाथिकृतीं
वैश्वानरींचसमानतंत्रांप्रतीष्टिंकृत्वासर्वार्थंसकृद्वाकृत्वानंतरातिपन्नयायजेत्॥॥॥अ
थहविषामर्थेव्रीहियवौमुख्यौ॥तयोर्लाभेप्रियंयवःतेषामभावेकोद्रवोदारकमाषव
र्जंसर्वाण्यारण्याऔषधयोभोजनेषविरुद्धायाह्याः॥॥यद्वाव्रीहियवप्रियंश्यामाकभावेश्या
माकनीवारवेणुयवाद्यारण्याऔषधयोयाह्यास्तेषामभावेतरसकंदमूलफलादि

याह्यं॥आज्यार्थेगवांघृतंमुख्यं॥तस्यालाभेमाहिषमाजंवाघृतं॥तयोरलाभेतैलंप्रतिनिधिः॥
तैलस्यालाभेजतिलतैलंअतसीकुसुंभसर्षपस्नेहाद्याद्याह्यास्तेषामलाभेपुन्नागमधूक
कादीनांबीजोद्भवस्नेहायाह्याः॥तेषामलाभेभोजनेषविरुद्धानारिकेलस्नेहायाह्याः॥॥लो
कशास्त्रविरुद्धानिनिंद्यादीनिवर्जयेत्॥सर्वालाभेयवपिष्टानिव्रीहिपिष्टानिश्यामाकपिष्टानि
वह्निःसंस्कार्य्याज्यार्थंप्रयुंजीत॥जैमिनिराज्यस्यचतुरःप्रतिनिधीनाह॥दध्यंवाह्यंदधिप
योवेलाज्यस्यप्रतिनिधयऽइति॥दध्यमीषद्घृतंनवनीतं॥शाकटादिनोद्धमानेदधि
वर्मन्येवयद्भवतितद्धाह्यं॥दधिपयसीप्रसिद्धे॥आज्यपयसोःपरस्परप्रतिनिधित्वंयथा
हकौंडिन्यः॥॥आज्याभावेपयःपयसोभावेआज्यंतद्वत्॥दर्भकार्यंकुशमुख्याः॥॥कुशा
भावेअश्ववालंतदभावेशरःकुतपऽइक्षवःसगंधितृणानिदूर्वाअर्जुनआदारः॥॥श्या
माकतृणमुंजायाह्याः॥गुंफकशुंकुनलबल्वजकुल्लतृणवर्जंसर्वतृणानिदर्भार्थंग्रहणी
यात्॥पालाशाःखादिरोवैल्वोमुख्याःपालाशास्त्रिविधः॥श्लक्ष्णकोलोमशोव्रतरिति॥
पलाशेषुत्रिविधेषुश्लक्ष्णकोमुख्यस्तदभावेऽतरौयाह्यौ॥खादिरोद्विविधःरक्तःपे

नोश्वेतिपालाशखदिराभावेयाज्ञिकानांवाक्षाणांअन्यतमस्येध्मः कार्यः॥तेषामप्यभावेनी प्र०
पानिंबबिल्वबाधकबैभीतकराजवृक्षशाल्मलतरुकपित्थकरंजकोविदारश्लेष्मातकफला
नि इतित्रयोदशाक्षान्वर्जयित्वासर्ववृक्षेभ्यइध्मंगृह्णीयात्॥दक्षिणानोकालेगोर्हिरण्यंवा
सश्चदक्षिणांदद्यात्॥यत्रक्वचयद्युक्तंतत्रतद्दक्षिणांदद्यात्॥यायाआदिष्टदक्षिणाइष्टयस्ते
नोक्तांदक्षिणांदद्यात्॥काम्येष्टिषुवासोदक्षिणा॥याअनादिष्टदक्षिणाःप्रायश्चित्तेष्ट्यादयः
तासुसर्वत्रहिरण्यंदद्यात्॥नित्येष्टिपशुषूक्तानोदक्षिणानामभावेफलानिमूलानिभक्ष्या
णिवादक्षिणांदद्यात्॥यथाकथंचिन्नित्यानिकर्तव्यानिनित्यंनित्यानिकुर्वीतनचनित्यानिलोप
येदित्याचार्यवचनात्॥काम्येष्टिनैमित्तिकेषुचयथोक्तदक्षिणांदद्यात्॥तदलाभेप्रत्याम्नाय
लेनशास्त्र्यनुसारेणहिरण्यंदद्यात्॥सतिद्रव्येहीनकल्पेनकुर्यात्॥यथाहमनुः॥हीनकल्पं
नकुर्वीतसतिद्रव्येफलाप्तदः॥प्रभुःप्रथमकल्पस्ययोनुकल्पेप्रवर्तते॥नपारलौकिकंतस्य
दुर्लभंविद्यतेफलं॥अमावास्यांनिशांत्यात्वाचतुर्दश्यामन्वाधानादिनेत्रेणारभ्येषःकालेचं
४५ दर्शेनेसतिनदामायश्चित्तेष्टिंकुर्यात्॥इष्ट्वायष्ट्यइतिसंकल्पः॥निर्वापकालेतंदुलान्वि ४५

भज्येयमध्यमास्तंदुलान्गृह्णन्येदाग्नेयंनिरूप्यष्टाकपालंपुरोडाशंनिर्वपेत्॥योस्तंविष्णु
स्तानिंद्रायत्रिदाग्नेयंचरुंनिर्वपेत्॥योऽग्निष्टाम्नाग्निंविष्णवेशिपिविष्टायचरुंनिर्वपेत्॥हविश्र
यणकालेचरुस्थालीमधिश्रित्यसायंदोहंदध्यानीयतंदुलानोप्यैंद्रायप्राजापत्येचरुं
श्रपयेत्॥विष्णवेचर्वर्थेस्थालीमधिश्रित्यप्रातर्दोहंश्रितमानीयतंदुलानोप्यविष्णवेशि
पिविष्टायस्रुतेचरुंश्रपयेत्॥एवंश्रपयित्वावैघामासाग्नयेत्॥अग्नेदासुषेरथिमानो
अग्नेऽग्नानिनइत्याग्नेयस्य॥अग्नेर्दातुरहमादः॥प्रदातारंहवामहेप्रदातावसीयस्या
इंद्रस्यप्रदातुरहमिंद्रियावी॥प्रतनेअद्यकिमिनेविष्णोरतिविष्णोःशिपिविष्टस्यविष्णोः
शिपिविष्टस्याहमन्नादःपुनरालंभवर्जंसंनिष्ठते॥प्रकोनामापुनामिधिंसमापयेत्॥अ
थचतुर्दश्यांप्रकोनामिधिंसमाप्यतदानींपुनर्विहव्यदर्शार्थमन्वाधायसायंदुग्धोपोष्य
श्वःकार्यमद्यापन्नामिधिंकुर्यात्॥यद्वापंचदशीचचतुर्दशींद्वयमुपवसथंकृत्वाचतुर्दश्यां
पंचदश्यांवासायंदोहंकृत्वाश्वोभूतेप्रतिपदिप्रातर्दोहंकृत्वायागंकुर्यात्॥आहिताग्नेःसो
मासंस्थाभावाच्चरुद्वयंस्थाप्यशुभपर्णेअन्यस्मिन्नाग्नेयेदिनेशिपिविष्टंद्र

र्शनेसतिचाहतिमिराहवनीयेस्रुवाकृतीर्कृत्वादंडेद्विजायदद्यात्॥ ।अथद्रव्यशुद्धिः॥मल
मस्त्रलोहितादिभिरुपहतेवस्त्रमृदाद्भिःप्रक्षालनाच्छुध्येत्।अशुचिनास्पृष्टंवस्त्रंप्रोक्षणा
च्छुध्येत्।अजिनंवासःसूत्रंवाप्रक्षालितमुत्तरीयंकुर्याच्चाप्रक्षालितं।अप्रक्षालितंनववस्त्रंक
र्मसुनोपयुंज्यात्॥परोपयुक्तंरुक्मजिनंवस्त्रंवानोपयुंज्यात्। वेणोःसूत्रादिभिरुपहतायां
मुपहतप्रदेशात्सूर्मिदाचंद्रोमयाद्भिरुपलेपनाच्छुध्येत्॥मृदुभस्मनापिअदहाच्चेत्कर्म
णोपलेपनाच्छुध्येत्॥आर्द्रायांवेणोःसूत्राद्यपहतायामुपहतप्रदेशात्तुरीषमुद्धृत्यमेध्य
मृदमन्यतआहृत्यपुरयित्वोपलेपनाच्छुध्येत्॥अल्पोपहतायांकर्षणादिकृत्वागोभिरा
क्रमणखननदहनादिभिर्वर्षणादिर्वास्त्रिसप्तवाशुध्येत्॥अल्पोपहतंचेदुपलेपनसो
मसूर्यांशुमारुतैश्चशुध्येत्॥उपहतायांभस्मौजपलेपनादिभिरसंस्कृतायांनिहितानां
कुशोध्मादीनांप्रक्षालनाच्छुद्धिःयत्तार्थंस्रुवादिभिराहृतानांकाष्ठयज्ञपादीनामाचक्ष
णाच्छुद्धिः।।अंगुलिप्रमाणरूक्षलानांसमिधामल्पोपहतौप्रोक्षाल्यशुद्धिः॥इध्मप्रणय
नीयेध्ममहापरिध्यादीनांअल्पोपहतौप्रक्षाल्यावशोषणाच्छुद्धिः॥सूत्राद्यपहतानां ४६

त्यागएवाआर्द्रीणांसत्वकानामुपहतौतक्षणाच्छुद्धिः॥स्रुक्कादीनांदारुमयपात्राणांच्छुद्धि
रर्वकमुच्छिष्टपुरीषस्पृष्टानांउपलेखनप्रोक्षणाच्छुद्धिःउच्छिष्टपुरुषेण॥च्छुद्धिरर्वस्पृ
ष्टानांप्रक्षालनाच्छुद्धिः॥उच्छिष्टलेपोपहतानांदारवीणांतक्षणप्रोक्षणाच्छुद्धिः॥अल्पोप
हतानांतक्षणासमर्थानांमंत्रेणपात्रांतरंगृहीत्वाभ्रराद्युर्मेत्यभिमंत्र्योपहतमक्षुप्र
क्षिपेत्॥भ्रमिर्भ्रमिमगादिति।सादितानांपात्राणामिध्मबर्हिःप्रभृतीनांमपिसूत्राद्य
पहतानांत्यागएवाग्निहोत्रेवर्मोच्छिष्टदधिघर्मेकुंडपायिनामयनेउत्सर्गिणामयनेदी
क्षायणयज्ञेचातुर्मास्येवाग्निहोत्रहवण्यादीनामुच्छिष्टसमन्वारब्धानामुच्छि
ष्टलेपोपहतानांचदर्भैःप्रक्षालनमेवाग्रहवमसानामुच्छिष्टसमन्वारब्धानांउच्छिष्ट
लेपोपहतानांचाद्भिर्मार्जालीयेलर्भैःप्रक्षालनाच्छुद्धिः॥सूत्राद्यपहतानांत्यागएवपा
त्रांतरस्वीकारश्च।मन्मयानामाज्यस्थाल्यादीनामल्पोपहतानामुच्छिष्टसमन्वारब्धा
नांचकुशाग्निनादहनाच्छुद्धिः॥उच्छिष्टलेपोपहतानांसूत्राद्यपहतानांत्यागः॥पात्रो
त्तरपरिग्रहश्च।तैजसानांसूत्रपुरीषोपहतानांसरुद्भस्मोदकैःप्रक्षालनाच्छुद्धिःताम्र

मयानामुच्छिष्टोपहतानांमृदकप्रक्षालनाशुद्धिः कांस्यानामुच्छिष्टोपहतानांभस्मदकैःप्रक्षाल
नाशुद्धिःअयोमयानामुच्छिष्टोपहतानांसकृत्सोदकैःशुद्धिः॥रजतकांचनयोरद्भिरेवप्रक्षा
लनाशुद्धिः॥विद्रिष्टस्रुत्रुक्पहतानामाग्नेयप्रतापनाशुद्धिः॥अश्ममयानांतैजसादिवच्छु
द्धिः॥पात्रभाजनानांबिल्वकपिच्छमयानामलाबुपात्राणांवेणुवेत्रकृतानांकुशादिनिर्मि
तानांगोमयांबुभिःप्रक्षालनाशुद्धिः॥व्रीह्यादीनांसतुषद्रव्याणांचंडालादिस्पर्शोपहतानांद्रो
णात्स्वल्पपरिमाणानांप्रक्षाल्यावशोषणाशुद्धिः॥द्रोणाधिकपरिमाणानांप्रोक्षणाशुद्धिः॥
तंडुलादीनांउदकादिभिःस्पृष्टानांशुद्धपात्रांतरेघवनयाशुद्धिः॥द्रोणस्यनानामुत्सर्गः॥द्रो
णाधिकानांस्पृष्टदेशोनावन्मात्रत्यागात्प्रोक्षणाच्छुद्धिः॥घृतपुरोडाशीयानामुदक्यादि
भिर्दृष्टानांत्यागः॥पयोदधिघृतादीनांउच्छिष्टसमन्वारब्धपात्रमात्रोपहतानांशुद्धपा
त्रांतरेघवनयाशुद्धिः॥पयोदधिघृतादीनांउच्छिष्टोपहतानांत्यागः॥स्रुग्भांडस्थितां
नांपयोदधिमध्वाज्यादीनांशुद्धपात्रांतरावनयाशुद्धिः॥आपणद्रव्याणांविक्रयाशु
द्धिः॥अग्निहोत्रद्रव्येतैलसर्पिः पयोदध्यादौनुच्छिष्टसमन्वारब्धेपात्रांतरवनीयो

दकेनिधायाग्निहोत्रार्थमुपयुंज्यात्॥शौचदेशाद्रव्यमंत्रवद्दर्वीसंस्कारकालानामष्टानांह
योर्विरोधेपूर्वस्यप्राबल्येपरस्यदौर्बल्यमितिअथातश्चोदनास्वाम्नातानिकृतानुमंत्रणानि
व्याख्यास्यामः॥इहप्रायश्चित्तप्रकरणेकृतानुमंत्रणकथनंप्रकृतिविकृत्योर्ज्ञानार्थंवि
कृत्यर्थंचअत्रोक्तैर्मंत्रैरनुमंत्रयेतयाजमानप्रकरणाम्नातैर्वेति।छंदस्याम्नातानिशा
खांतराम्नानीतियावन्नरतथानियतशब्दोच्चारणेप्रमाणंनास्ति।इहविकृत्युपवेशा
प्रयोजनंविकृतिष्वपिप्रायश्चित्तातिदेशार्थंतत्रचविकृतीनांदध्यामिक्षापश्वनामतौसो
म्यप्रायश्चित्तातिदेशः॥तथाश्येनादीनांकालातिपत्तौदर्शपूर्णमासकालातिपत्ति
वत्प्रायश्चित्तातिदेशःएवमन्यषामपिकर्मांतेसामान्येनप्रकृतिविकृतिभावज्ञः॥दर्श
पूर्णमासाविष्टीनांपूर्वोक्तविधिनिर्णयार्थमिदमारभ्यते।दर्शश्चपूर्णमासश्च।
इष्टिश्चादयस्तदर्थभाजः॥यथादेवतमिष्टमनुमंत्रयेत।यासामन्यादिदेवतानांयाजमा
नकांडेकृतानुमंत्रणान्यकृतानिमंत्रप्रायश्चित्तकांडेचयासांवैश्वदेवादीनांकृतानुमंत्रणान्यु
क्तानितांस्तथैवानुमंत्रयेत॥तत्रविशेषोवक्ष्यते॥एवमनादिष्टानेष्टकपालानामेयविकृ

